श्री गुरुभ्यो नमः

वासिष्ठलैंगम्

प्रथमोऽध्यायः

यस्य प्रसादलेशस्य लवला भबलेन तु

सर्वसिद्धिरयत्नेन तं नमामि विनायकम् १

1. Undertaking here [to present] with the power of full illumination of right knowledge, a small portion of the finest layer of the unbounded infinite silence of eternal Being.
Accomplishing everything perfectly without effort, to him [Gaṇeṣa] the Remover of Obstacles, I bow down.

यत्प्रसादेन सविज्ञानं यथावज्ञायते नृणाम्

तं वंदे षण्मुखं साक्षाद्ज्ञानशक्तिधरं परम् २

2. The precise and comprehensive science which describes the characteristics of the finest layer of silence within the unbounded infinite eternal Being is the highest knowledge ever to dawn in human awareness.
I surrender to Him, [Lord Śiva,] the Omnipresent six-faced God who is fully open to my vision, the sustainer of the power of knowledge (gyān śakti), the transcendental Being.

नमो रुद्राय सोमाय सदा सर्वस्य साक्षिणे

शर्वाय सर्वभीमाय संसारोत्तरहेतवे ३

3. I bow down to Lord Rudra, to Soma, to Him who is the eternal witness of everything in creation,
to Śarva, the ruler of death, to the terrific and formidable form of Totality, to Him who is the ultimate cause of successive rebirth (Saṁsāra).

यस्याः पदांबुजद्वंद्वस्मरणादेव केवलम्

विमुक्तिस्सर्वजंतूनां देव्यै तस्यै नमो नमः ४

4. From Mother Divine, from whom alone comes the tradition of duality, sustained by being born successively in different wombs, from Her also comes the integrated state of Self-sufficiency, the state of Total Knowledge. To that Goddess, Mother Divine, who leads all living beings on to fulfillment and final liberation, I bow down again and again.

सूतः

Sūta [said:]

श्रीमत्कैलासमागत्य वसिष्ठो भगवान्मुनिः

तपश्चकार सत्कर्म निरतो नियमेद्रियः ५

5. Having come to the highly auspicious Mount Kailash, the holy sage Vasiṣhṭha

Having performed great austerity, virtuous, possessed of inner fulfillment, his senses fully under control.

दिव्यं वर्षसहस्रं तु वायुभक्षोऽग्निमध्यगः

श्रीमत्पंचाक्षरं साक्षाच्छतरुद्रीयमध्यगम् ६

6. Divine, 1000 years old, living on air [as his only sustenance], the constant companion of Agni [through his long meditations,] he was resplendent with the brilliance of the 5 syllable mantra; he moved about in the company of the hundred names (in the Śatarudriya portion of Yajur Veda) made [manifest as forms] visible to the senses [through his constant performance of Rudra-abhisheka].

सर्वपापहरं पुरयं प्रणवेन षडक्षरम्

जजाप शंकरं द्रष्टुं वांछया मुनिसत्तमः ७

7. Having cleared away all stresses and become pure by the repetition of Praṇava, consisting of six syllables,

[Vasiṣhṭha,] The most virtuous of sages was softly whispering the name of Śiva from his heart-felt longing to see him,

ततः प्रसन्नो भगवानुमया सह शंकरः

लिंगज्योतिः स्वरूपेण पुरतोऽत्र प्रकाशितः ८

8. The Divine Mother, Umā, together with Śiva, the Redeemer, being kindly disposed towards him, at that time
A liṅgam made of pure light, Lord Śiva in his own true form, became clearly visible here, in front of Vasiṣhṭha.

मुनिश्च विस्मया विष्टः किमेतत्पुरतः स्थितम्

इति संचित्य सर्वात्मा भगवान् परमेश्वरः ९

9. The sage was filled with wonder, [thinking,] "What is this standing in front of me?"
as he became aware of the presence of the Soul of the Universe, the glorious Supreme Ruler.

स एव भगवान् रुद्रप्रादुरासीदिति स्मरन्

प्रणम्य वाङ्मनः कायैर्भक्तियुक्तो महामुनिः १०

10. "It can only be the Divine Lord Rudra who has become manifest and is seated before me," he realized.
Physically prostrating with his body, the great sage expressed in speech the overflow of his heart thrilled with devotion.

पूजयामास देवेशं गंधपुष्पफलोदकैः

पुनश्चेशः प्रकाशेऽस्मिन् प्रसन्नो भक्तवत्सलः ११

11. Vasiṣhṭha performed *Pūja* to the Ruler of the Gods, ceremonially offering incense, flowers and fruits,
Expressing again and again, that it is God Himself who, out of kindness to his devotee, had become visible here in this form of light.

दक्षिणामूर्तिमास्थाय प्रत्यक्षमगमन्मुनेः
वसिष्ठो देवमालोक्य वटच्छाये निषेविनम् १२
व्याघ्रचर्मांबरधरं ज्ञानमुद्राधरं हरम्
अक्षमालाधरं देवं भस्माधारं च पुस्तकम् १३
हैरण्यामृतकुम्भं च गङ्गा चन्द्रकळां तथा
दधानं सर्वदेवेशं सर्वाभरणभूषितम् १४
पार्श्वस्थितं वृषं देवं नीलग्रीवं त्रिलोचनम्
प्रलम्बितजटाबद्धं भस्मदिग्धतनूरुहम् १५
गोक्षीरधवळाकारं पूर्णचंद्रनिभाननम्
यागपट्टाभिरामं तं वेदयज्ञोपवीतिनम् १६
वीरासने समासीनं विश्वलोकैकनायकम्
अपस्मारोपरिन्यस्त पादपङ्कजमीश्वरम् १७
सर्वलक्षणसंपन्नं नागाभरणभूषितम्
सनकादिमहायोगिसेवितं सर्वकारणम् १८
पपात दण्डवद्भूमौ भक्त्या युक्तोऽम्बिकापतिम्
देवोऽपि करुणां प्राप्तो मुनिमालोक्य सुव्रतम् १९
प्राह गंभीरया वाचा किमर्थं तप्तवांस्तपः
प्रसन्नोऽहं तवातीव मुने वेदविदां वर २०

कांक्षितं सकलं प्राज्ञ तव दास्याम्यनुग्रहात्
इत्युक्तो मुनिशार्दूलो वसिष्ठः प्रीतमानसः २१
प्रणम्य दण्डवद्धीमान् भक्त्या परमया युतः
स्तोत्रैः स्तुत्वा महादेवं पप्रच्छाशेषमीश्वरम् २२
वसिष्ठ उवाच
भगवन् देवदेवेश सर्वलोकैकनायक
सत्यचैतन्यसंपूर्ण परमानन्दलक्षण २३
किं कारणमशेषस्य जगतः परमेश्वर
कोऽधिष्ठाता तयोर्युक्तः कः संबन्धो महेश्वर २४
कथं जातं जगत्सर्वं चेतनाचेतनात्मकम्
किं तत्परतरं तत्वं यस्मान्नास्ति परं शिवम् २५
किं लक्षणं तत्परमं कावामुक्तिः परस्य तु
कावामुक्तिर्महादेव कस्य मुक्तिः प्रकीर्तिता २६
केन बद्धो महादेव किं वा मोक्षस्य लक्षणम्
कानि स्थानानि देवस्य प्रियाणि परमेश्वर २७
कीदृशो भगवन्धर्मः कीदृशो धर्म उच्यते
किं प्रमाणं महादेव कथं पूज्या महेश्वर २८
को वा पूजाविशेषस्य फलभेदो महेश्वर

किं भस्मोक्तं महादेव केन भस्मेति कीर्तितम्  २९
किं तत्कतिविधं प्रोक्तं केषां धार्यं  महेश्वर
केन मंत्रेण तद्भस्म धार्यं  देवे नरैस्सदा  ३०
कीदृशं धारणं प्रोक्तं कीदृशी भावना मता
किं फलं धारणस्यास्य प्रोक्तं वेदेषु शंकर  ३१
रुद्राक्षधारणं कुत्र प्रोक्तं देववृषध्वज
केन मंत्रेण देवेश कथं भावनमीरितम्  ३२
केषां धार्यं  महादेव किं फलं धारणस्य तु
किं जप्यं ब्राह्मणैर्नित्यं विशेषेण महेश्वर  ३३
जपः केन प्रकारेण पुनश्चर्या च कीदृशी
किं फलं जपमात्रेण नरः प्राप्नोत्यनर्गळम्  ३४
कथं वर्णाश्रमाचारः प्रोक्तो वेदेषु शंकर
युगधार्माः कथं प्रोक्तस्सर्वदा भक्तवत्सल  ३५
कथं दारुवनं प्राप्तो भगवन्नीललोहितः
किं कृतं मुनिभिस्तत्र देवदेवेन किं कृतम्  ३६
किमर्थं  शंकरस्साक्षाद्देवदारुवनंगतः
किमुक्तं तत्र देवेन मुनिभ्यः परमेश्वर   ३७
ऋभुं ब्रह्मा कथं पुत्रं जनयामान शंकर

ऋभुश्चेश निदाघाय कथं ब्रह्मोपदिष्टवान् ३८
कथमिंद्रपदं प्राप्तश्चंद्रो दुष्करकृत्सदा
तेन विद्या कथं लब्धा ब्रूहि मे परमेश्वर ३९
इति ब्रह्मर्षिणा पृष्टो भगवान्भक्तवत्सलः
प्राह सर्वं क्रमेणैव शंकरः शशिभूषणः ४०
इति वासिष्ठलैंगे उपपुराणे प्रथमोऽध्यायः

द्वितीयोऽध्यायः

ईश्वर उवाच
कारणं जगतो माया प्रोक्ता वेदान्तवेदिभिः
अधिष्ठाता महेशानस्तच्च माया वशान्मम १
सा च मत्तः पृथक् नास्ति वस्तुवृत्तेन सुव्रत
तथापि सत्यवद्भाति मत्सत्ता योगहेतुना २
अचित्य एव संबंधस्सर्वदा मुनिसत्तम
तथापि मुनिशार्दूलमन्मयेत्यब्रवीच्छ्रुतिः ३
प्राणिनां कर्मपाकेन कालपाकेन सुव्रत
गुणत्रयात्मकामाया विभक्ता प्रळयं गता ४
महान् जायेत मायायास्सत्वक्षोभे ममा ज्ञया

तेनाह मोक्षे सर्वज्ञः स्त्रष्टव्यं सकलं मुने ५
ततो रजो गुणं गत्वा ब्रह्माख्योऽहं महामुने
सृजामि सकलं प्राज्ञ इदं शक्तेस्तु वैभवात् ६
ततः सत्वगुणं गत्वा विष्णुसंज्ञोऽहमीश्वरः
पालयामि जगत्कृत्स्नं मुने मच्छक्तिवैभवात् ७
संहरामि जगत्कृत्स्नं तमसा वशवर्तिना
रुद्रसंज्ञोऽहमीशानो मन्माया वैभवेन हि ८
ब्रह्माप्यनेकधा भिन्नो गुणवैषम्यता मुने
विष्णुश्च बहुधा भिन्नस्तथा रुद्रोऽप्यनेकदा ९
मायायाश्शब्द उद्भूतो मन्नियोगान्महामुने
शब्दाद्वेदा मया दध्नो नवनीतमिवोद्धृतम् १०
पुनश्शब्दात्समुद्भूतं स्पर्शतत्वं महामुने १०
स्पर्शाद्रूपं रसस्तस्माद्गन्धस्तस्मात्समुद्भभा
एषु भूतेषु वै ब्रह्मात् जायन्ते ब्रह्ममूर्तयः ११
तत्र सर्वज्ञतापन्नश्शब्दजां मूर्तिमागतः
ईक्षितत्वं गतो देवश्शब्दजां मूर्तिमाविशत् १२sparśajāṁ
रुद्रसंज्ञस्य देवस्य रूपे मूर्तिः प्रजायते
तेन विप्ररसे क्षिप्तं वीर्यं मूर्त्यभिमानिना १३

तदंडमभवद्वीर्यं सहस्त्रकिरणप्रभम्
विष्णुस्तु प्राविशद्ब्रह्मन् मम शक्तेस्तु वैभवात् १४
पुनर्नारायणाख्यं मे नियोगात्प्राप्तवानसौ
इमं चोदाहरन्त्यत्र श्लोकं नारायणं प्रति १५
आपस्सूक्ष्मो रसः प्रोक्तो रसो नारः प्रकीर्तितः
नरजा तत्वतो ब्रह्मन् रसस्साक्षाच्छिवो मतः १६
नारमस्यायनप्रोक्तं तेन नारायणः स्मृतः
ब्रह्मापि मुनिशार्दूल गन्धजां मूर्तिमाविशत् १७
ईश्वरः स्पर्शमूर्तिस्स्याच्छब्दमूर्तिस्सदाशिवः
रुद्रस्तेजोमयस्साक्षाद्रसमूर्तिर्जनार्दनः १८
गंधमूर्तिश्चतुर्वक्त्र इत्येताः पंचमूर्तयः
एवं मूर्तिषु जातेषु पंचभूतेषु सुव्रत १९
सर्वेंद्रियाणां प्राणानां जायन्ते च समष्टयः
एता हिरण्यगर्भस्य कूटस्थस्य महात्मनः २०
अन्तःकरणदेहस्य प्राणाश्च करणानि च
ब्रह्मा हिरण्यगर्भो भूत्तत्र प्राणो हरस्वयम् २१
सूत्रात्मा भून्महादेवस्तयोरन्तर्नियामकः
पुनश्च मुनिशार्दूल ब्रह्माण्डं मन्नियोगतः २२

पञ्चभ्यः स्थूलभूतेभ्यो जायते स्वप्नलोकवत्
पुनर्नारायणो देवी ममा ज्ञावशमागतः २३
हिरण्यगर्भस्त्रीरूपं कारयित्वा तु मायया
तस्यां विराजमसृजन्मुने ब्रह्माण्डविग्रहम् २४
स्वराडुभाभ्यामुत्पन्नः सम्राट् चैव तथा मुने
अंडमध्ये मुनिश्रेष्ठ भुवनानि ममाज्ञया
उत्पद्यंते मुनिश्रेष्ठ जीवाः कर्मानुरूपतः २५
सृष्टिरुक्ता मया ब्रह्मन् जगतस्संग्रहेण तु
सर्वं मायामयं बुध्वा विसृजात्मविशुद्धये २६
इति श्रीवासिष्ठलैंगे द्वितीयोऽध्यायः

तृतीयोऽध्यायः
ईश्वर उवाच
शिव एव परं तत्वं ततो नास्त्यधिकं मुने
तल्लक्षणं महाप्राज्ञ श्रुतिषु श्रूयते सदा १
सत्यज्ञानं सुखानन्तं जगत्सर्गादिकारणम्
मूर्तिरस्य मुनिश्रेष्ठ शिरसा श्रूयते श्रुतेः २
उमया सहिता नित्या नीलग्रीवा त्रिलोचना

स्वात्मतत्वसुखमूर्त्तिमुदिता तांडवप्रिया ३
ब्रह्मविष्णुमहेशानैरुपास्या सर्वदा मुने
भोगमोक्षप्रदा पुण्यपुंसां वेदविदांवर ४
सैव मे परमामूर्तिरुपास्या सर्वदा तव
अविद्याया निवृत्तिर्या सैवमूर्त्तिः प्रकीर्तिता ५
ज्ञानादेव विमुक्तिस्स्यादज्ञानात्तस्य बन्धनात्
अज्ञानपाशबन्धत्वादमुक्तः पुरुषस्सदा ६
ज्ञानात्तस्य विनाशस्स्यात् ज्ञानं वेदान्तवाक्यजम्
यज्ञादीनि च कर्माणि ज्ञानेच्छायास्तु कारणम् ७
श्रीमत्कैलासमचलं सर्वदा भुक्तिमुक्तिदम्
सर्वदेवसमाकीर्णं सर्वगंधर्वसेवितम् ८
सर्वयक्षसमाकीर्णं सर्वचारणसेवितम्
सर्वसिद्धिसमाकीर्णं सर्वजन्तुसमावृतम् ९
विद्धि मे सततं ब्रह्मन्नतीव प्रियमुत्तमम्
वाराणसी पुरी पुण्या मरणादेव मुक्तिदा
देवासुरमुनींद्रैश्च सेव्यमाना प्रिया मम १०
श्रीमद्व्याघ्रपुरं पुण्यं त्रिषु लोकेषु विश्रुतम्
दर्शनादेव सर्वेषां भुक्तिमुक्तिफलप्रदम् ११

ब्रह्मविष्णवमरेंद्राद्यैस्सेव्यमानं महामुने
पतंजलिसमाख्येन नागराजेन सुव्रत १२
व्याघ्रपादेन च ब्रह्मन् जन्मांतरतपो बलात्
यत्र वृत्तं पुरादृष्टं तन्मे नित्यं प्रियं मुने १३
श्रीमद्वल्मीकमाश्चर्यं जनानां मुक्तिदं सदा
लक्ष्मी यत्र पुरा राध्य मामवाप्ता चिरेण तु १४
पुरा सर्वेषु नष्टेषु प्रळये मुनिपुंगव
दृष्ट्वा स्थानमिदं वृष्टं कस्येदमिति सत्तमैः १५
स्मरणादेव पापघ्नं तन्मे ब्रह्मन्प्रियं सदा
पम्पातीरे मुनिश्रेष्ठ पुरं कांचीति विश्रुतम् १६
आराधितः पुरा देव्या यत्राहं भक्तियुक्तया
यत्र साक्षान्महादेवी नित्यं सन्निहितादरात् १७
यत्रोपवासमेकं वा कुर्वाणो मुक्तिमाप्नुयुः
तन्मे साक्षात्प्रियं विद्धि पुरं वेदान्तवित्तम १८
श्रीपर्वतो महाशैलः श्रीसदाशिवविग्रहः
सिद्धैश्च साधकैर्नित्यं सेवितस्सर्वसिद्धिदः १९
यत्र साक्षान्महादेवो वाङ्मनोऽतीतविग्रहः

दृश्यते ज्योतिरूपेण सोऽपि नित्यं प्रियो मम  २०
श्रीमद्ब्रह्मपुरं नाम त्रिषु लोकेषु विश्रुतम्
कल्पे कल्पे पुरा ब्रह्मन् ब्रह्मणा राधितं मुदा  २१
मुनिभिर्देवगन्धर्वैस्सेवितं सर्वदादरात्
यत्र भक्तिमतां देवो ज्ञानं सम्यक्प्रयच्छति  २२
यत्र नावं समारुह्य प्रळये दिवि संस्थितम्
तन्मे प्रियतमं विद्धि ब्रह्मन्ब्रह्मविदां वर  २३
श्वेतारण्यं महातीर्थं  कावेर्या उत्तरे तटे
यत्र साक्षाच्चतुर्द ती पूजयामास शंकरम्  २४
पुष्कराणां त्रयं यत्र नित्यं सन्निहितं मुने
यत्र स्नात्वा नरः षष्ठ्यां माघमासे तथैव च  २५
चतुर्दश्यां तु वैशाखे तथाष्टम्यांसितेतरे
रवौ मिथुनमापन्ने तदा वेदविदां वर  २६
आदित्ये वृश्चिकं प्राप्ते चतुर्दश्यामुपोषितः
यथा शक्त्यन्नपानादि दत्वा मुक्तिमवाप्नुयात् २७
यत्र वेदविदां श्रेष्ठस्नात्वा पर्वणि पर्वणि
वत्सलाल्लभते भीष्टं तन्मे प्रियतरं मुने  २८
मध्यार्जुनं महातीर्थं  कावेर्यादक्षिणे तटे

यत्र विघ्नेश्वरो देवः पूजयामास शंकरम् २९
आदित्ये मकरं प्राप्ते पुष्ये वेदविदां वर
यत्र स्नात्वा तु कावेर्यां दत्वा विप्राय भोजनम् ३०
अग्निदाहात्सुरापानाद्ब्रह्महत्यादिपातकात्
मुच्यते मुनिशार्दूल नरः स्वर्गं च विंदति ३१
यत्र स्नात्वा च कावेर्यां मासि मासि च पर्वणि
प्रदक्षिणत्रयं कृत्वा देवं दृष्ट्वाभिवाद्य च ३२
संवत्सरादवाप्नोति सकलं वांछितं नरः
तन्मे साक्षात्प्रियं विद्धि समचित्तमहामुने ३३
कुम्भकोनं महातीर्थं कावेर्या दक्षिणे तटे
नानादेवसमाकीर्णं नाना मुनिसमावृतम् ३४
माखे वर्षे महाप्राज्ञ माखमासे मखे दिने
मखलग्ने मुनिश्रेष्ठ यत्र तीर्थानि सादरम् ३५
स्नात्वा संभूय कावेर्यां देवमाराध्य भक्तितः
तत्पार्श्वे दक्षिणे ब्रह्मन् तटाके तानि सुव्रत ३६
सान्निध्यं सर्वलोकानामुपकाराय वै मुने
कुर्वं ति यत्र कावेर्यां स्नात्वा पर्वण्युपोषितः ३७
दत्वाल्पमपि विप्राय शिवलोके महीयते

तन्मे साक्षात्प्रियं विद्धि स्थानं संसारनाशनम्  ३८
जप्येश्वरं महास्थानं कावेर्य उत्तरे तटे
पञ्चनद्यो महापुण्याः पूज्या यत्र स्थिताहरम्  ३९
शिलादो यत्र सौभाग्यात्तपस्तप्त्वा महेश्वरम्
दृष्ट्वा संपूज्य यत्नेन त्वरितेन शिवेन च  ४०
लब्धवां तत्प्रसादेन नन्दीशं पुत्रमात्मनः
यत्र संपूज्य देवेशं कृतार्थास्सप्तमातरः  ४१
यत्र पूज्य महादेवं धर्मस्साक्षाद्वृषोभवत्
यत्र स्नात्वा तु कावेर्यं दृष्ट्वा देवं प्रणम्य च  ४२
यथा शक्तिप्रसादेन नरः साक्षाच्छिवं व्रजेत्
तन्मे प्रियतमं स्थानं विद्धि वेदविदांवर  ४३
सेतुमध्ये मुनिश्रेष्ठ गन्धमादनपर्वते
साक्षाद्विष्णुर्जगन्नाथो रामो दशरथात्मजः  ४४
भूत्वा लोकोपकाराय रावणं राक्षसेश्वरम्
हत्वा तत्पापशुध्यर्थं स्थाप्य सर्वेश्वरं पुनः  ४५
रामेश्वर इति ब्रह्मन्संज्ञां चक्रे स्वनामतः
पुनः स्नात्वा समुद्रेऽस्मिन् गन्धमादनपर्वते
पूज्य रामेश्वरं देवं नत्वा भक्तिप्रिये रतः  ४६

ब्राह्मणान्भोजयित्वास्मिन् स्थाने रामः स्वभार्यया
विलोक्य देवसंघांश्च मुनिभिर्वानरैस्सह ४७
प्रसादयित्वा देवेशमिदं वचनमब्रवीत्
आदित्ये मकरं प्राप्ते तथा कर्कटके स्थिते ४८
कन्यकायां स्थिते चार्के चन्द्रे चादित्यसंयुते
विषुवायनयोस्तद्वत्सर्वग्रस्ते दिवाकरे ४९
चंद्रे च राहुकेतुभ्यां ग्रस्ते केवलपर्वणि
अत्र स्नात्वा जितक्रोधो दृष्ट्वा रामेश्वरं नरः ५०
उपोष्य ब्राह्मणान्भक्त्या भोजयित्वा यथा बलम्
दत्वा वस्त्रं धनं भूमिं कन्यकामपि भूषिताम् ५१
सर्वपापविनिर्मुक्तश्शिवसायुज्यमाप्नुयात्
इति श्रुत्वा मुने देवा मुनयश्च नरोत्तम ५२
तथैवास्त्विति संभूय प्राप्य रामेश्वराज्ञया
ततः परं महातीर्थमभवत्तं महामुने ५३
गोघ्नश्चापि कृतघ्नश्च भ्रूणहा मातृहा तथा
सुरापी च गुरुद्रोही वेदानिंदा परो नरः ५४
वरदारपरश्चैव तथान्ये पापकर्मणः
अत्र स्नात्वा शिवं दृष्ट्वा मुच्यते सर्वपातकैः ५५

लक्ष्मणश्च तथैवास्मिन् स्थाने वेदविदां वर
लक्ष्मणेश्वरनाम्नासौ स्थापयामास शंकरम्  ५६
तस्याग्रे कल्पयत्तीर्थं  नाम्ना लक्ष्मणकुंडकम्
तत्तीर्थे वपनं कृत्वा शिरोमात्रं शिवाज्ञया  ५७
विसृज्यात्रैव रोमाणि स्नात्वा भक्त्या त्र्यंबकम्  ५८
लक्ष्मणेश्वरमीशानं दृष्ट्वा स्तुत्वा प्रणम्य च
यथा शक्ति प्रदानेन नरश्शिवपुरं व्रजेत्  ५९
सुग्रीवश्चांगदश्चैव हनुमान्मारुतात्मजः
यत्र सर्वेश्वरं भक्त्या प्रतिष्ठाप्य स्वनामभिः  ६०
पूजयामासुरीशानं राघवस्याज्ञया मुने
तन्मे साक्षात्प्रियं विद्धि स्थानं सर्वार्थसादनम्  ६१
सोमनाथं महास्थानं सोमेनैव प्रतिष्ठितम्
यद्दृष्ट्वा जायते जंतुर्न पुनर्भुवि सुव्रत  ६२
तन्मे प्रियतमं विद्धि सर्वकामफलप्रदम्
केदारं तु महास्थानं केदारेण प्रतिष्ठितम्  ६३
भोगमोक्षप्रदं पुंसां दर्शनादेव सुव्रत
गङ्गायां पूज्य देवेशं कृतार्थासागरं गता  ६४
तन्मे प्रियतमं विद्धि स्थानं सर्वफलप्रदम्

भीमेश्वरं महापुरायं भीमेनापि सुपूजितम्  ६५
गोदावरी महापुराया यं पूज्यैव वरप्रदा
यं दृष्ट्वा सर्वपापेभ्यो मुच्यते मानवो मुने
तन्मे प्रियतमं विद्धि स्थानं वेदान्तवित्तम  ६६
श्रीमद्वृद्धाचलं स्थानं शिवस्येष्टतमं सदा
एकोदके निरालम्बे जलस्योपरिसंस्थितः  ६७
मणिमुक्तानदीतीरे दक्षिणे मुनिपुंगव
अगस्त्यापि पुरा ब्रह्मन्नाराध्यात्र महेश्वरम्  ६८
अस्युन्नताचरत्वेन नराणां दृष्टि गोचरम्
अत्यल्पमकरो लोकहितार्थाय मुने सदा  ६९
यत्र दृष्ट्वा महादेवं श्रीमद्वृद्धाचलेश्वरम्
स्तुत्वा नत्वा मुने जन्तुर्न पुनर्जायते भुवि
वाप्नोति नरकं घोरं मानवो मुनिसत्तम  ७०
यत्र नद्याममावास्यां स्नात्वा ध्यानपुरस्सरम्
यथा शक्तिधनं धान्यमन्यच्च शिवयोगिने  ७१
दत्वा प्रदक्षिणे कृत्य श्रीमद्वृद्धाचरेश्वरम्
दृष्ट्वा नत्वा मुने जंतुर्नपुनर्जायते भुवि  ७२
यत्रादित्यस्य वारे तु मणिमुक्तानदीजले

स्नात्वा दत्वा यथा शक्तिवस्त्रं वा स्वर्णमेव वा ७३
तिलं वा तण्डुलं वापि विदुषे ब्राह्मणाय च
श्रीमद्वृद्धाचलेशाय नरस्साक्षाच्छिवं व्रजेत् ७४
यत्र वेदविदां श्रेष्ठ मखर्क्षे माखमासि च
अस्यां नद्यां रवौ चोपस्थिते चन्द्रदिने नरः ७५
मया सार्धं दिने स्नात्वा यथा शक्ति धनं मुदा
दत्वा भुक्तिं च मुक्तिं च ब्रह्मन्नाप्नोत्यनर्गळम् ७६
यत्र नित्यं मुने भक्त्या मुष्टिमात्रं ददाति यः
इह लोके सुखी भूत्वा प्रेत्यरुद्रं स गच्छति ७७
तन्मे प्रियतमं स्थानं विद्धि वेदविदां वर
गोपव्रतं महास्थानं गोभिर्नित्यं सुपूजितम् ७८
श्रीमद्वृद्धाचलस्यास्य ब्रह्मन्नुत्तरतः स्थितम्
यत्र देवी महासार्धं क्रीडते सततं मुदा ७९
यत्र गोपव्रतेशानमर्कवारे च पर्वणि
विषुवायनकालेषु सुमुहूर्तैथवा नरः ८०
प्रदक्षिणत्रयं कृत्वा प्रणम्य भुवि दंडवत्
यत्र देवी मया सार्द्धं क्रीडते सततं मुदा
तथा गोपव्रतेशानं विदुषे वेदवित्तम ८१

यथा शक्ति धनं दत्वा ब्रह्मणाय नघाय च
इह लोकोऽनुखी भूत्वा प्रेत्यनिर्वाणमृच्छति ८२
यत्र गोपव्रतेशानमुद्दिश्य शिवयोगिने
मुष्टिमात्रमपि ब्रह्मन्ददाति सविमुच्यते ८३
तन्मे प्रियतमं स्थानं विद्धि साक्षाद्विमुक्तये
श्रीकाळहस्तिशैलाख्यं स्थानं सर्वत्र विश्रुतम् ८४
सुवर्णमुखरी तीरे किरातैश्च समावृते
अस्यां नद्यां पुरा ब्रह्मा स्नात्वा नित्यं दृढव्रतः ८५
तपस्तप्त्वा चिरं घोरं जप्त्वा पंचाक्षरं मुने
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येन राधमाः ८६
कलिदोषेण वै सर्वे पापिष्ठाः स्युर्न संशयः
वेदमार्गात्परे भ्रष्टा भविष्यन्ति कलौ युगे ८७
अल्पायुषो भविष्यन्ति दरिद्राश्च न संशयः
सन्धिव्याध्यस्त्रशस्त्रादिपीडिताश्च पुनः पुनः ८८
अनावृष्टिर्महातीव्रा भविष्यति न संशयः
अतः केनैव मार्गेण सकलं सुस्थितं भवेत् ८९
इति संचिन्त्य सर्वात्मा पूजयामास शंकरम्
प्रसन्नो देवदेवो हमभवं पूजया तदा ९०

पुनश्च पूजयामास वदो पायं हरेति सः
मयाप्युपायो ब्रह्मर्षे प्रोक्तः सर्वार्थसाधनः ६१
आदित्ये चापसं युक्ते चन्द्रे सूर्येण संयुते
अस्यां नद्यां मया सार्धं स्नात्वा मां सेव्यसादरम्
मामुदिश्य यथाशक्ति वस्त्रं वा स्वर्णमेव वा
तिलं वा गां महीं वापि कन्यकामथवापि वा ६२
अन्नपानादि चान्यच्च प्राणिनां यत्सुखावहम्
दत्वा तद्ब्रह्मविद्भ्यस्ते तदनुज्ञामवाप्य सः ६३
अस्मिन्प्रदक्षिणीकृत्य स्थाने मामंबिकापतिम्
दिनमेकं कुरु ब्रह्मन्प्रतिमा समतंद्रितः ६४
वत्सरांते महादेवं स्थानेऽस्मिन् श्रद्धया सह
समाराध्य प्रसादेन सर्वं साधयवांचितम् ६५
इत्युक्तो मुनिशार्दूल मया ब्रह्मा चतुर्मुखः
सुवर्णमुखरीं गत्वा देवदेवेन सादरम् ६६
एवं व्रतं करिष्येऽहमिति संकल्प्य बुद्धिमान्
स्नात्वा संपूज्य देवेशं दत्वा ब्रह्मविदे धनम् ६७
ब्राह्मणेभ्यश्च मे धावी तदनुज्ञामवाप्य च
प्रदक्षिणात्रयं कृत्वा ब्रह्मन्ब्रह्मविदां वर ६८

स्तोत्रैः स्तुत्वा मुने भक्त्या प्रणिपत्य पुनः पुनः
प्रतिमा संचरित्वैतद्व्रतमेवं समाहितः ९९
वत्सरांते समाराध्य स्थानेऽस्मिन् परमेश्वरम्
दृष्ट्वा भवानी सहितं त्रिणेत्रं चंद्रशेखरम् १००
नीलग्रीवं विरूपाक्षं विश्वलोकैकनायकम्
प्रार्थयामास धर्मात्मा लोकानां हितमुत्तमम् १०१
देवोऽपि करुणा विष्णो वीक्ष्य साक्षाच्चतुर्मुखम्
तथा भविष्यति तु ब्रह्मन् लोकानां हितमुत्तमम् १०२
इत्युक्त्वा देवदेवोऽपि तत्रैवान्तरधीयत
अस्यां नद्याममावास्यां स्नात्वा भक्त्या समाहितः १०३
श्रीकाळहस्तिनाथाय त्रिः कृत्वा तु प्रदक्षिणम्
दृष्ट्वा देवं तु यत्किंचिद्ददाति स विमुच्यते १०४
विषुवायनकालेषु व्यतीपातेऽथवा नरः
अन्यां स्नात्वा महादेवं प्रणम्य मुनिपुंगव १०५
दृष्ट्वा दत्वा यथा शक्तिमहापापात्प्रमुच्यते
ब्राह्म्ये मुहूर्ते वोत्थाय पादौ प्रक्षाळ्य सादरम् १०६
श्रीकाळहस्तिनाथं मां त्रिः कृत्वा तु प्रदक्षिणम्
दृष्ट्वा प्रणम्य मेधावी सर्वपापात्प्रमुच्यते १०७

तत्र दृष्ट्वा महादेवं दिनमेकमुपोषितः
नाप्नोति नरकं घोरं सत्यं सत्यं महामुने १०८
अन्यान्यपि महास्थानान्यद्भुतानि महामुने
सर्वमेतेषु सर्वेषु स्थानमेतद्विशिष्यते १०९
अत्र भक्तिमतां नृणां मुक्तिः साक्षात्करे स्थिता
बहवो मां समाराध्य स्थानेऽस्मिन्मुनिसत्तम ११०
संसारबंधनान्मुक्तास्त्वनायानेन सुव्रत
क्षेत्रपालोऽपि मां पूज्य स्थानेऽस्मिन् मुनिसत्तम १११
अभून्मम प्रसादेन सर्वलोकैकपालकः ११२
सर्वलोकाधिपत्यं च प्राप्तवानचरेण तु
आदित्योऽस्मिन् महास्थाने पूज्य मामादरेण तु ११३
मत्प्रभावान्महातेजा ह्यभवन्मुनिसत्तम
चन्द्रः संपूज्य मां प्राप्तः शैत्यं सर्वजनप्रियम्
किमत्र बहुनोक्तेन श्रूयतां मुनिपुंगव ११४
सुवर्णमुखरीस्नानं कृत्वा ध्यानपुरःसरम्
श्रीकाळहस्तिनाथं मां त्रिः कृत्वा तु प्रदक्षिणम् ११५
प्रणम्य सर्वमाप्नोति नात्र कार्या विचारणा
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ११६

पुत्रार्थी लभते पुत्रान् कन्यार्थी कन्यकामियात्
आरोग्यकामस्त्वारोग्यं विजयार्थी जयं लभेत् ११७
वश्यार्थी वश्यमाप्नोति धनार्थी धनमाप्नुयात्
ब्रह्महा मद्यपाया च तथान्ये पापकर्मिणः ११८
सर्वपापात्प्रमुच्येरन् नित्यमस्यैव सेवया
स्थानमेतत्प्रियं विद्धि मम देव्याश्च सुव्रत ११९
तस्मात्त्वं च महाभाग मामत्राराधयादरात्
इति श्रीमद्वासिष्ठलैंगे उपपुराणे स्थानमाहात्म्यं नाम
तृतीयोऽध्यायः

चतुर्थोऽध्यायः
ईश्वर उवाच
श्रुत्वा वेदविदां श्रेष्ठ विहितो धर्म उच्यते
निषिद्धो धर्म इत्युक्तस्तव ज्ञानदृढात्मनः १
प्रमाणं वेद एव स्याद्धर्माधर्मे च मह्यपि
वर्णाश्रमसमाचारात्पूज्यो देवो न चान्यथा २
प्रथमायां द्विजः स्नात्वा वाग्यतो भक्तिमान्नरः
उपलिप्य समां भूमिं गोमयेन स्वयं मुदा ३

आसनं परिकल्प्यास्मिन् आवाह्य वृषभं ततः
लिंगमूर्तिं महादेवं स्नाप्य पुण्योदकेन च ४
पंचाक्षरेण मंत्रेण प्रतिष्ठाप्य वृषासने
पुष्पैर्नाना विधैर्ब्रह्मन् तंडुलैरर्चयेत्ततः ५
धूपं दत्वा पुनर्दीपमन्नं पानं च बुद्धिमान्
प्रदक्षिणात्रयं कृत्वा स्तोत्रैः स्तुत्वाभिवंद्य च ६
दद्यात्पूजा फलं तस्मै सफलं कांक्षमेद्बुधः
ब्रह्महत्या कृतं पापं छित्वा स्वर्गमवाप्नुयात् ७
द्वितीयायां तथा स्नात्वा ब्रह्मचर्यपरायणः
पंचाक्षरेण मंत्रेण स्नाप्य लिंगं समाहितः ८
तिलैश्च तंडुलैः पुष्पैः पूज्यपूर्वोक्तमन्त्रतः
हविर्निवेद्यमेधावी दिनमेकमुपोषितः ९
सुरापानकृतं पापं दग्ध्वा स्वर्गं च विंदति
तृतीयायां तथा पूज्य शिवलिंगं समाहितः १०
ब्राह्मणान् भोजयित्वा तु स्वर्णस्तेयात्प्रमुच्यते
चतुर्थ्यां शंकरं भक्त्या पूज्य पूर्वोक्तमार्गतः ११
यथा शक्तिधनं दत्वा ब्रह्मणाय समाहितः
गुरुतल्पगदोषेण मुच्यते नात्र संशयः १२

पंचम्यां तंडुलेनैव पूज्य पूर्वोक्तमार्गतः
महापातकिसंसर्गदोषान्मुक्तो भवेन्नरः १३
षष्ठ्यां घृतेन संस्ताप्य चंदनेन जतेन च
उपपातकदोषेण मुच्यते नात्र संशयः १४
सर्वम्यांशुद्धतोयेन स्नाप्य पुष्पैः प्रपूजयेत्
क्षुद्रपापात्प्रमुच्येत मुनिनात्रास्ति संशयः १५
अष्टम्यां पंचगव्येन स्नाप्य तोयेन शंकरम्
सर्वपापविनिर्मुक्तश्शिवलोकमवाप्नुयात् १६
नवम्यां मधुना स्नाप्य शुद्धतोयेन शंकरम्
कुलैकविंशमुत्तीर्य सगच्छेत्परमं पदम् १७
दशम्यां पयसा स्नाप्य कुशपुष्पोदकेन च
सर्वपापविनिर्मुक्तसम्यक् ज्ञानमवाप्नुयात् १८
एकादश्यां शुचिः स्नात्वा भोजनेन विवर्जितः
शिवं शुद्धोदकैः स्नाप्य शिवलोके महीयते १९
द्वादश्यामभिषिच्येशं गुग्गुलुं धूपयेन्नरः
ब्रह्मलोकमवाप्नोति नात्रकार्या विचारणा २०
त्रयोदश्यां शिवं पूज्य शंकरं चंदनैस्सह
विलिप्य सर्वपापेभ्यो मुच्यते नात्र संशयः २१

चतुर्दश्यां महादेवं स्नाप्य पूर्वोक्तमार्गतः
तिलतंडुलपुष्पाद्यैः पूज्य विप्रं तु भोजयेत् २२
अभीष्टं सकलं लब्धा शिवलोकमहीयते
पंचदश्यां शुचिः स्नात्वा तोयेनैवाभिषेचयेत् २३
+ष्पैर्नानाविधैः पूज्य ब्राह्मणान्भोजयेन्मुदा
+श्वर्यमचलं लब्धा प्रेत्य स्वर्गमहीयते २४
षोडश्यां देवमाराध्य ब्रह्मणं भोजयेन्नरः
शिवनीलोकमाप्नोति नात्र कारा विचारणा २५
+रणयां मुद्रमध्यर्च्य ब्रह्मणं भोजयेन्मुदा
++मलोकमवाप्नोति यावदा चंद्रतारकम् २६
++कायां शिवं पूज्य ब्रह्मणानेव भोजयेत्
++नलोकमवाप्नोति नात्र कार्या विचारणा २७
++णयां शंकरं पूज्य ब्रह्मणायान्नदो नरः
सर्वपापविनिर्मुक्तो ब्रह्मलोकमवाप्नुयात् २८
+गशीर्षे महादेवं पूज्यन्नं वस्त्रमेव च
ब्राह्मणायादराद्दत्वा चंद्रलोकमहीयते २९
++र्द्रायां देवमाराध्य दद्याद्ब्रह्मविदे धनम्
++ की ज्ञानमवाप्नोति नात्र कार्या विचारणा ३०

++त्येयोर्चयत्वेशं ब्रह्मणानेवभोजयेत्

++यलोकमाप्नोति स पुनर्ब्रह्मगच्छति ३१

++ज्य महादेवं विप्रायान्नंददातियः

++++नया बुध्या भवेदत्र न संशयः ३२

+++महादेवं पूज्यं पुष्पं ददाति यः

++लोकमवाप्नोति न पुनस्तत्र जायते ३३

+देवं समाराध्य तिलानामाढकं नरः

++वं वा द्रोणयुग्मं वा ब्रह्मणाय ददाति यः ३४

सर्वपापविनिर्मुक्तः पितृलोकमवाप्नुयात्

भगनक्षत्रके भक्त्या पूज्य देवं त्र्यंबकम् ३५

यथा शक्तिप्रदानेन भगलोकमवाप्नुयात्

++त्तरे शिवमभ्यर्चगां ददाति द्विजातये ३६

++र्यलोकमवाप्नोति नात्रकार्या ++रणा

++स्ते पूज्य महादेवदत्वा ब्रह्मविदे धनम् ३७

++र्यलोकमवाप्नोति सुखं चाक्षयमश्नुते

++तायामेश्वरं पूज्य दत्वा भक्त्यांगुळीयकम् ३८

++रं प्राप्यतेनैव सह रुद्रमवाप्नुयात्

++तौ सोमं समभ्यर्च ब्रह्मणानविभोजयेत् ३९

++युलोकमवाप्नोति साख्यं चानंत्यमश्नुते
++खे पूज्य देवेशं दत्वा ब्रह्मविदे धनम्  ४०
इंद्राग्नि त्वमवाप्नोति शिवं प्राप्नोत्यसंशयः
++राधा दिने साक्षादपि पूज्य वृषध्वजम्  ४१
+ब्रह्मणहस्तेऽर्थं  मैत्रलोकमवाप्नुयात्
++यां शिवमाराध्य दत्वा माषं द्विजातये  ४२
++लोकमवाप्नोति मुने कात्र विचारणा
++ले महेश्वरं पूज्य ब्रह्मणाय ददाति यः  ४३
++सनै ऋतं लोकं गत्वा रुद्रमवाप्नुयात्
++राक्षाढनक्षत्रे पूज्य देवं त्र्यंबकम्  ४४
++वातंडुलमन्यद्वा ब्रह्मणायानसूयवे
++वा वस्त्रं हिरण्यं वा ब्रह्मलोकमवाप्नुयात्  ४५
++थवा विश्वदेवत्वमाप्नुयान्नात्र संशयः
++ वणे रुद्रमभ्यर्चदत्वा विप्राय भोजनम्  ४६
विष्णुलोकमवाप्नोति सुखं चाक्षय्यमश्नुते
श्रविष्ठायां समाराध्य नीलग्रीवं त्रिलोचनम्  ४७
वसूकां लोकमाप्नोति मुने नात्र विचारणा
रुद्रं शतभिषेपूज्य ब्रह्मणायानसूयवे  ४८

दत्वा वस्त्रं हिरण्यं वा वारुणं लोकमाप्नुयात्
पूर्वाभाद्रपदे पूज्य पुराणं परमेश्वरम्  ४९
एकपादहरं याति मुने नात्र विचारणा
य+पूज्योत्तरे भाद्रे शिवं परमकारणम्  ५०
ब्रह्मनाय विनीताय ददाति धनमुत्तमम्
अहिर्बुध्न्यमवाप्नोति नात्र संशयकारणम्  ५१
शि++मपिपूज्ये शंबत्वा विप्राय भोजनम्
++र्यलोकमवाप्नोति सत्यं सत्यं वदाम्यहम्  ५२
++क वारे महादेवं त्रिः कृत्वा तु प्रदक्षिणम्  ५३
++णाम्यदंडवद्भूमौ भक्त्या परमया सह
++त्वा चंदनाद्यैस्तु स्वशरीरमलंकृतम्  ५४
++ग्यं ददाति या वेश्याय देष्टं शिवयोगिने
++ण्य फलं ब्रह्मन्श्रुणु वेदविदां वर  ५५
++हात्यासुरापानस्वर्णास्तेयादिपातकैः
++तेनात्र संदेहे मद्भक्तस्याभिपूजनात्  ५६
++लोके मुने पुंसां वल्लभा भवति ध्रुवम्
++ आरोग्यमैश्वर्यमपि प्राप्नोत्यसंशयः  ५७
++मार्य प्रतीकाशे विमानैर्बहुभिस्सह

++लोकमाप्नोति सुखं चाक्षयमश्नुते ५८
++रेतु विद्वांसं धनं दत्वा तु भोजयेत्
++लंकृतां ब्रह्मनस्य पुरायफलं श्रुणु ५९
सर्वपापविनिर्मुक्तसर्वैश्वर्यमवाप्नुयात्
प्रेत्य चेश्वरमाप्नोति मुने नात्र विचारणा ६०
सोमवारे महादेवं दृष्ट्वा भूमौ प्रणाम्य च
वस्त्रं वाधनमस्य द्वा ददाति शिवयोगिनी ६१
संकराश्च तु मुच्यंते पापैस्सर्वैर्न संशयः
भौमवारे महादेवं प्रणाम्य शिवयोगिनी ६२
ददाति धनमन्यध्वानयुद्धजयप्नुयात्
बुधवारे विरूपाक्षं प्रणाम्य भुविदंडती ६३
अभ्यंगं योगिनः कुर्वनारोग्यं शीघ्रमाप्नुयात्
जीववारे शिवं दृष्ट्वा प्रणाम्य परमेश्वरम् ६४
ज्ञानिनं भोजयित्वा तु शीघ्रं ज्ञानमवाप्नुयात्
शुक्रवारे मुने दृष्ट्वा प्रणाम्य वृषवाहनम् ६५
शिवयोगिकरे दत्वा यत्किंचिद्धनमुत्तमम्
वंध्या पुत्रमवाप्नोति नरश्चाप्नोति कांक्षतम् ६६
मंदवारे महादेवं नमस्कृत्य तु योगिने

ददाति धनमत्यल्पमपि यो मुनिसत्तम ६७
सराज्ञां वल्लभो भूत्वा धनमक्षयमाप्नुयात्
व्यतीपाते धनं चान्नं तिलं वा तंडुलं तु वा ६८
नमस्कृत्य महादेवं योगिने यो ददाति सः
सर्वपापविनिर्मुक्तः स्वर्गं मोक्षं च विंदति ६९
बहुनोक्तेन किं ब्रह्मन्महादेवस्य पूजनात्
निकृष्टोऽपि विमुच्येत स्वसंसारमहो ददेः ७०
यश्शिवं पूजयेन्नित्यं लिंगे भक्त्या मुने तु सः
नयाति नरकं घोरं शिवं साक्षादवाप्नुयात् ७१
दानानि यज्ञाश्च महातपांसि सन्यासवृत्तिश्च
जितेंद्रियत्वम्
सर्वं न तुल्यं भवतीश्वरस्य लिंगास्य नित्यार्चनयेति
विद्धि ७२
इति वासिष्ठलैंगे उपपुराणे शिवपूजा
फलमहिमानुवर्णनं नाम चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

ईश्वरः

भस्म विद्धि परंब्रह्मसत्यबोधसुखाद्वयम्
भर्त्सनात्सर्वपापानां पापिनां च महामुने १
भस्मेति कीर्तितं रक्षा रोगाणां चापि रक्षणात्
भयेभ्यो रक्षणाच्चैव भर्त्सनाद्भसितं तथा २
क्षरयत्यखलान् दोषान्यदक्षरमिति स्मृतम्
भस्म तद्वेदनाल्लभ्यममुख्यं तु ततः परम् ३
आग्नेयं गौणमज्ञानध्वंसकं ज्ञानसाधनम्
गौणं नानाविधं विद्धि ब्रह्मन्ब्रह्मविदां वर ४
अग्निहोत्राग्निजंतद्वद्विरजाहोमजं मुने
जौपासनसमुत्पन्नं समिदग्निसमुद्भवम् ५
पचनाग्निसमुत्पन्नं दावानलसमुद्भवम्
त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवम् ६
विरजा नलजं चैव धार्यं भस्म महामुने
जौपाससमुत्पन्नं ग्रहस्थानां विशिष्यते ७
समिधग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणाम्
शूद्राणां श्रोत्रिया गारे पचनाग्निसमुद्भवम् ८
अन्येषामपि सर्वेषां धार्यं दावानलोद्भवम्
अग्निरित्यादिभिर्मं त्रैष्षड्भिराधर्वणैस्तथा ९

जाबालैस्सप्तभिर्वापि गौणेनैव तु भस्मना
उद्धूळयेत्स्वकं देहं पापपुंजभयापहम्  १०
त्र्ययायुषेण मंत्रेण मेधावीत्यादिना तथा
गौणे न भस्मना धार्यं त्रिपुंड्रं ब्रह्मचारिणाम्  ११
त्र्यंबकेन मंत्रेण सतारेण तथा वच
पंचाक्षरेण मंत्रेण प्रणवेन युतेन च  १२
ललाजे हृदये चैव दोर्द्वं द्वे च महामुने
त्रिपुंड्रं धारयेन्नित्यं ग्रहस्थश्च वनाश्रमे  १३
आत्ममंत्रेण हंसेन प्रणवेन समाहितः
त्रिपुंड्रं धारयेन्नित्यं सन्यासाश्रममाश्रुतः  १४
नमोऽतेन शिवेनैव शूद्रश्शिश्रूषणेरतः
उद्धूलनं त्रिपुंड्रं च नित्यं भक्त्या समाचरेत्  १५
अन्येषामपि सर्वेषां विना मंत्रेण सुव्रत
उद्धूळनं त्रिपुंड्रं च कर्तव्यं भक्तितो मुने  १६
एवं भस्म धृतं येन तस्य पुण्यफलं श्रुणु
महापातकसंघाश्च पातकान्यपराणि च  १७
नश्यंति मुनिशार्दूलसत्यं सत्यं न चान्यथा
यतीनां ज्ञानदं प्रोक्तं वनस्थानां विरक्तिदम्  १८

ग्रहस्थानां मुने न्यायधर्मवृद्धिकरं तथा
ब्रह्मचर्याश्रमस्थानां स्वाध्यायप्रदमेव च  १९
शूद्राणां पुण्यदं नित्यमन्येषां पापनाशनम्
येन भस्मोक्तमार्गेण नधृतं मुनिपुंगव  २०
तस्य विद्धि मुने जन्म निष्फलं सूकरो यथा
ये भस्म धारिणं त्यक्त्वा श्रौतस्मार्तानुवर्तिनः  २१
तैस्समाचरितं सर्वं विपरीत फलप्रदम्
येषां क्रोधो भवेद्ब्रह्मन् ललाटे भस्मदर्शनात्  २२
तेषामुत्पत्तिसांकर्यमनुमेयं विपश्चिता
ये भस्म धारिणं दृष्ट्वा वाचा निंदति मानवाः  २३
तेषां शूद्रेण संभूतिरनुमेयं विपश्चिता
ये भस्म धारणं क्रोधान्नराः कुप्यंति ताडनम्  २४
तेषां चंडालतो जन्म ब्रह्मन्नूह्यं विपश्चिता
येषां नास्ति मुने श्रद्धा श्रौते भस्मनि सर्वदा  २५
गर्भाधानादि सम्स्कारस्तेषां नास्तीति निश्चयः
येषां भस्मनि विद्वेषो वर्तते हृदये सदा  २६
संकीर्णसाभवेद्ब्रह्मन्तेषां वंशपरंपरा
चंडालो वाथ शूद्रो वा बस्मनी प्रीतमानसः  २७

सोनंतरे जन्मनि च भवेद्विप्रो न संशयः
ये भम्स दारिणं दृष्ट्वा परितुष्टा भवंति ते २८
देवानुरमुनींद्रैश्च पूज्या नित्यं न संशयः
येषां दानं श्रुतिर्यज्ञस्तपश्चान्यानि सुव्रत २९
भस्म धारणपूर्वं स्यात्तेषां तत्सफलं भवेत्
भस्म दिग्धशमीराय यो ददाति धनं मुदा ३०
तस्य सर्वाणि पापानि विनश्यंति न संशयः
भस्म संछन्नसर्वां गं दृष्ट्वा तिष्ठति यः पुमान् ३१
तं दृष्ट्वा देवराजोऽपि दंडं ++ करिष्यति
अभक्ष्य भक्षणं येषां बस्म धारणपूर्वकम् ३२
तेषां तद्भक्ष्यमेव स्यान्मुने नात्र विचारणा
यः स्नाति भस्मना नित्यं जते स्नात्वा ततः परम् ३३
ब्रह्मचारी ग्रहस्थो वा वानप्रस्थोऽथवादरात्
सर्वपापविनिर्मुक्तस्सयाति परमांगतिम् ३४
आग्नेयं भस्मना स्नानं यतिभ्यस्तु विधीयते
आर्द्रस्नानात्परं भस्म ह्यार्द्रे जंतु वयो ध्रुवम् ३५
आर्द्रं तु प्रकृतिं वंद्यात्प्रकृतिं बंधनं विदुः
प्रकृतेस्तु प्रहाराय भस्मना स्नानमिष्यते ३५

अहो मोहस्य माहात्म्यं मया वक्तुं न शक्यते
यन्नरो भस्मसा पायं त्यक्त्वा न्यत्र विचेष्टते  ३६
बहुनोक्तेन किं भस्म धारणं मोक्षसाधनम्
भस्मना नित्ययुक्तस्य ज्ञानमुत्वाद्यते चिरात्  ३७
पातकी पातकान्मुक्तो भविष्यति न संशयः
बस्मना सदृशं ब्रह्मन्नास्ति लोकत्रयेष्वपि  ३८
रक्षार्थं  मंगळार्थं  च पवित्रार्थं  महापुरा
भस्म दृष्ट्वा मुने वेदे दत्तं देव्यै प्रियेण तु  ३९
जानाति मां त्वं परभस्म रूपं
मुनेऽग्निहोत्रादिसमुत्थितानि
मामेवमंत्रेण ददाति गौणं स याति मुक्तिं परविद्ययैव
४०
इति वासिष्ठलैंगे भस्मविधिविशेषो नाम
पंचमोऽध्यायः

षष्ठोऽध्यायः
ईश्वरः
बध्वा स्वर्णेन रुद्राक्षं रजितेनाथवा मुने

शिखायां धारयेन्नित्यं कर्णयो समाहितः १
यज्ञोपवीते वा हस्ते कंठे तु द्वेऽथवा नरः २
श्रीमत्पंचाक्षरेणैव प्रणवेनैव वाथवा
आत्ममंत्रेण मेधावी रुद्राक्षं धारयेन्मुदा ३
रुद्राक्षधारणं साक्षाच्छिवज्ञानस्य साधनम्
रुद्राक्षं यश्शिखायां तु परं तत्वमिति स्मरन् ४
कर्णयोरुभयोर्ब्रह्मन्देवं देवीं च धारयेत्
यज्ञोपवीते देवांश्च तथा हस्ते दिशः स्मरेत् ५
कर्णे सरस्वतीं देवीं पावकं चैव भावयेत्
सर्वाश्रमाणां वर्णानां रुद्राक्षाणां च धारणाम् ६
कर्तव्यं मंत्रतः प्रोक्तं द्विजानां नान्यवर्णनाम्
रुद्राक्षधारणाद्रुद्रो भवत्येव न संशयः ७
पश्यन्नपि निषिद्धांश्च तथाश्रुणवन्नपिस्मरन्
जिघ्रुन्नपि तथा चाश्नन् प्रलपन्नपिसंततम्
तथा च ह्यफलं कर्म तथा विद्युक्तमेव हि ८
तथा निंद्य फलं ब्रह्मन् सततं कर्म चैव हि
कुर्वन्नपि सदागच्छन् विसृजन्नपि मानवः ९
रुद्राक्षधारणा देवपापैस्सर्वैर्न लिप्यते

अनेन भुक्तं रुद्रेण यथा भुक्तं तथा भवेत् १०
पीतं रुद्रेण पीतं स्यात्खातं खातं शिवेन तत्
रुद्राक्षधारणे लज्जा येषामस्ति महामुने ११
तेषां नास्ति विनिर्मोक्षस्संसाराज्जन्मकोटिभिः
रुद्राक्षधारिणं दृष्ट्वा परिवादं करोति यः १२
उत्तत्तौ तस्य सांकर्यमस्त्यैवेति विनिश्चयः
रुद्राक्षधारणा देवरुद्रो रुद्रत्वमागतः १३
मुनयस्सत्यसंकल्पा ब्रह्माब्रह्मत्वमागतः
रुद्राक्षधारणाच्छ्रेष्ठ न किंचिदिह विद्यते १४
रुद्राक्षधारिणे भक्त्या वस्त्रं धान्यं ददाति यः
सर्वपापविनिर्मुक्तश्शिवलोकं स गच्छति १५
रुद्राक्षधारिणं श्राद्धे भोजयित्वानुमोदतः
पितृलोकमवाप्नोति नात्रकार्या विचारणा १६
रुद्राक्षधारिणः पादौ प्रक्षाळ्याद्भिः पिबेन्नरः
सर्वपापविनिर्मुक्तश्शिवलोके महीयते १७
हारं वा कटकं वापि सुवर्णं वा द्विजोत्तम
रुद्राक्षसहितं भक्त्या धारयन् रुद्रतामियात् १८
रुद्राक्षं केवलं वापि यत्र कुत्र महामुने

अमंत्रकं वा मंत्रेण सहितं पापवर्जितम्  १९
यो वा को वा नरो नित्यं धारयेल्लज्जया विना
सर्वपापविनिर्मुक्तसमक् ज्ञानमवाप्नुयात्  २०
अहो रुद्राक्षमाहात्म्यं मया वक्तुं न शक्यते
तस्मात्सर्वप्रयत्नेन कुरु रुद्राक्षधारणम्  २१
कश्चित्पुरा मुने जात्या चंडालो तीव्रदुर्जनः
अस्ति ब्रह्मन्कृतं तेन ब्रह्महत्य सहस्रकम्  २२
गवां सहस्रं निहतं दिनं प्रतिमहामुने
अन्यानि यानि कर्माणि घोराराण्या चरितानि च  २३
तथापि तस्य पापानि मुने रुद्राक्षधारणात्
दग्धानि शल्मली तूलं यथा दावाग्निसंयुतम्  २४
कातेन मरणं प्राप्तस्सपुनर्यममागतः
सोऽपि तं प्राह भगवन् यमस्सर्वर्थवित्तमः  २५
अहो पापं कृतं सर्वं  त्वया लोके चरन् ततः
तत्फलं च मया बुध्वा शक्यं भोजयितुं न हि  २६
पापं च सकलं दग्धं तव रुद्राक्षधारणात्
गच्छ गच्छ विमानेन शिवलोकं सुखावहम्  २७
सोऽपि सूर्यप्रतीकाशं विमानं सार्वगामिकम्

आरुह्य नृत्तगीताद्यैर्वृतश्शिवपुरं गतः   २८
तत्र दत्तं महा तस्य ब्रह्मन् रुद्रपदं मुदा
देवैश्च मुनिभिश्चान्यैः पूजितस्स सदाप्यसौ  २९
तस्मात्सर्वैस्सदा कार्यं रुद्राक्षाणां च धारणम्
भोगमोक्षप्रदं पुंसां मया चैतद्धृत सदा  ३०
इत्युपपुराणे वासिष्ठलैंग्ये रुद्राक्षमाहात्म्यं नाम
षष्ठोऽध्यायः

सप्तमोऽध्यायः
ईश्वरः
ओमित्येकाक्षरं ब्रह्म तारकं प्रणवाभिदम्
जप्यं नित्यं विशेषेण ब्रह्मणैर्वेदवित्तमैः  १
ऋषिश्छंदो देवताश्च शक्तिं बीजं च सुव्रत
करन्यसं तथा चांगन्यासं कृत्वा जपेन्नरः  २
ऋषिर्ब्रह्मास्यमंत्रस्य प्रोक्तं वेदेषु शंकरः
हंससयादिति केषांचित्पक्षो वेदांतवादिनाम्  ३
छन्दश्च देवे गायत्री परमात्माधि देवता
बीजमाद्यक्षरं विद्धि मंत्रस्यास्य महामुने  ४

उकारश्च मकारश्च विद्धि शक्तिं सनातनीम्
न्यसेत्केशादिपादां तं कराभ्यां प्रणवं बुधः ५
हस्तस्य कूर्परादूर्ध्वं वामहस्तेन संस्पृशेत्
वामदक्षिणहस्तेन मंत्रेणानेन संस्पृशेत् ६
हस्तयोरुभयोर्धीमानंगुळीनां च संधिषु
अंगुष्ठादिकनिष्ठांतं विन्यसेदक्षरत्रयम् ७
प्रनशच विन्यसेद्धीमान् प्रणवं स्वांगुळीषु च
अंगुष्ठानामिकाभ्यां तु नाभौ विन्यस्य तारकम् ८
अंगष्ठतर्जनीभ्यां तु प्रणवं हृदि विन्यसेत्
मध्यमा तर्जनीभ्यां तु प्रणवं शिरसि न्यसेत् ९
त्रिः कृत्वा विन्यसेदेवं नाभौ हृदि च मूर्धनि
भूरस्यात्मन इत्युक्त्वा हृदयायेति मंत्रवित् १०
नमश्चोक्त्वा हृदि न्यस्य तथा शिरसि विन्यसेत्
प्राजापत्यात्मने शब्दं भुवः पूर्वं महामुने ११
शिरसे शब्दसम्युक्तं स्वाहांतं मंत्रमुच्चरन्
स्वस्सूर्यात्म न इत्युक्त्वा शिखायैवौषटित्यपि १२
शिखां वापि न्यसेन्मंत्रं मंत्रे मंत्रस्य विन्यसेत्
भूर्भुवः स्वरिति प्रोच्य पुनर्ब्रह्मात्मनेऽपि च १३

कवचाय हुमित्युक्त्वा कवचं विन्यसेद्बुधः
स सत्यात्म न इत्युक्त्वा तथास्त्राय फडित्यपि १४
अस्त्रं च विन्यसेत्पार्श्वे मंत्रे मंत्रस्य सिद्धये
पुनश्च प्रणवं व्याप्तं विद्यादाचार्य पूर्वकम् १५
चिन्मात्रं ज्योतिषस्साक्षादात्मनस्सर्वसाक्षिणः
ओमित्येकाक्षरं ब्रह्म प्रादुर्भूतं यथा पुरा १६
पुनश्च लोकरक्षार्थं त्रिधा भूतं महाज्ञया
अकारं प्रथमा विद्धि द्वितीयं विद्ध्युकारकम् १७
मकारं च तृतीयं तु विद्धि वेदविदां वर
ऋषिरग्निरकारस्य गायत्री च्छंद उच्यते १८
ब्रह्मास्य देवता प्रोक्तः पीतो वर्णप्रकीर्तितः
अवस्था जाग्रदित्युक्ता भूस्थानं पोच्यते मया १९
उदात्तस्वर इत्युक्तो मुने ऋग्वेद उच्यते
अन्योक्ता गार्हपत्याग्निः प्रातस्संध्या प्रकीर्तिता २०
रजो गुण इति ख्यातस्तथा वेदविदां वर
सृष्टिरर्थं क्रियोत्पत्ता विनियोगस्तु कीर्तितः २१
ऋषिर्वायुरुकारस्य त्रिष्टुप्छंदः प्रकीर्तितः
देवता विष्णुरस्योक्ता विद्युद्वर्णः प्रकीर्तितः २२

स्वप्नावस्था भवेदस्य भुवः स्थानं प्रकीर्तितः
अनुदात्तस्वरः प्रोक्ता यजुर्वेदप्रकीर्तितः २३
दक्षणाग्निस्समाख्यातस्संध्यामाध्यंदिनं भवेत्
सत्वं गुण इति प्रोक्तं सर्वशास्त्रविशारदैः २४
स्थितिरर्थं क्रिया प्रोक्ता विनियोगस्तु पालने
ऋषिस्सूर्यो मकारस्य जागतिश्छन्द उच्यते २५
ईश्वरो देवता प्रोक्तः श्वेतो वर्णः प्रकीर्तितः
सुषिप्तिस्स्यादवस्थास्य स्वस्थानं स्वरितस्वरः २६
सामवेदो भवेदस्याहवनीयोग्निरीरितः
सायं संध्यातमो धर्मस्संहारोऽर्धक्रिया भवेत् २७
संहारे विनियोगोऽस्य प्रोक्तः पुण्यवताम्
यत्किंचिद्द्विविधं वस्तु लोके वेदे च गीयते २८
तत्सर्वम् त्रिविधं विद्धि त्रिधा भूतत्वहेतुना
यद्यदेशात्मना भाति लोके वेदे च सत्तम २९
तत्सर्वं प्रणवं विद्धि ब्रह्मन्नेकात्मकत्वतः
ओंकारमेव तद्ब्रह्मन् विद्धि सनातनम् ३०
सर्वार्थसाधकत्वेन सर्वदा मुनिपुंगव
ज्ञातेऽर्थे तद्वदज्ञाते संदिग्धे च विपर्यये ३१

सर्वार्थे च जनो नित्यप्रयुङ्क्ते शब्दमोमिति
सर्वानुकारी रूपं हि ब्रह्मसच्चित्सुखावहम् ३२
ओंकारो यमपि ब्रह्मन् सर्ववस्त्वमुकार्यतः
ब्रह्मन्साक्षात्परं ब्रह्म विद्ध्योंकारं सनातनम् ३३
प्रपंचो ह्याहमोंकारस्स प्रपंचस्य शूलिनः
वाचको निष्प्रपंचो यं निष्प्रपंचस्य लक्षणम् ३४
ब्रह्मणः प्रणवस्यापि ब्रह्मन् ब्रह्मविदां वर
वाच्य वाचकभावोऽपि लक्ष्ये लक्षणतापि च ३५
आगंतुकी यथा ब्रह्मन् तथैवानादिरेव हि
एवमोंकारमाहात्म्यं ज्ञात्वाचार्य प्रसादतः ३६
जितेंद्रियो जितक्रोधो वाग्यतः स्वस्तिकाननः
पर्वताग्रेन दीतीरे गुहायां वा शिवालये ३७
अस्येषु बुद्धिरम्येषु स्थानेष्वप्यग्रतो मुने
प्राङ्मुखोदङ्मुखो वापि शाकमूलफलाशनः ३८
भिक्षा हारोऽथवाचार्यं स्मृत्वा सांबं त्र्यंबकम्
प्रणम्य मनसा मंत्रं प्रणवाख्यं जपेन्नरः ३९
लक्षत्र्यं भवेन्मंत्री मंत्रसिद्धो भवेद्ध्रुवम्
उपोष्य ग्रहणे भक्त्या पायसान्नं स्वयं नरः ४०

मंत्रेणाष्टसहस्त्रं तु हुत्वा जातिस्मरो भवेत्
यस्तद्वा दशसाहस्त्रं जपमन्वहमाचरेत् ४१
तस्य द्वादशभिर्मन्तैः परं ब्रह्मप्रकाशते
पलाशपुष्पहोमेन सर्वज्ञत्वामवाप्नुयात् ४२
अश्वद्धस्य समिद्धो माद्ब्राह्मण्यं संस्थितं भवेत्
दूर्वा होमदवाप्नोति दीर्घमायुर्न संशयः ४३
अन्नज्य होमादाप्नोति मुने राज्यं द्विजोत्तम
कन्यकामो लभेत्कन्यां लाजहोमेन मव्रत ४४
वैराग्यकामो लभते वैराग्यं घृतहोमतः
आरोग्य कामस्त्वारोग्यं लभते घृतहोमतः ४५
जयार्थी जयमाप्नोति शमी होमान्न संशयः
श्रियोर्थी श्रीमवाप्नोति शमी पत्रस्य होमतः ४६
यद्यदिच्छेति तत्सर्वं लभते पुष्पहोमतः
स्वात्वा जितेंद्रियश्शुद्धो लक्ष्मेकं बवेद्द्विजः ४७
ब्रह्मतत्य कृतं पापं रहस्यं नश्यति क्षणात्
स्नात्वा जलान्नरे स्थित्वा लक्ष्मेकं जपेद्द्विजः ४८
सुरापानकृतात्पापाद्रहस्यान्मुच्यते हि सः
स्नात्वा मौनी शिवस्याग्रे लक्ष्मेकं जपेद्द्विजः ४९

सुवर्णस्तेयदोषेण रहस्येन विमुच्यते
स्नात्वा नित्यं जितक्रोधो दक्षिणामूर्तिसन्निधौ ५०
लक्षं जप्दिद्विमुच्येत रहस्याद्गुरुतल्पगात्
यस्तु लक्षं जपेन्नित्यं स्नात्वा सूर्यस्य सन्निधौ ५१
समहापातके पापान्मुच्यते रहसि स्थितात्
अयुतं तु जपेन्नित्यं दृष्ट्वा देवं जितेंद्रियः ५२
क्षुद्रपातकदोषेण मुच्यते नहि संशयः
यस्तु लक्षत्रयं स्नात्वा वाग्रतः प्रतिवत्सरम् ५३
सजपेत्सर्वदोषेण प्रसिद्धेनापि मुच्यते
स्वप्नमैथुनरेतश्च यतिः प्रस्खलितायते ५४
स्नात्वाष्टोत्तरसाहस्रं जप्तदोषाद्विमुच्यते
यदि प्रस्खलितं भिक्षोरिंद्रियं बुद्धिपूर्वतः ५५
ब्राह्मण्यमप्रसिद्धं चेत्स्नात्वा मौनी जितेंद्रियः
लक्षमेकं जपेत्साक्षाद्देवदेवस्य सन्निधौ ५६
मुच्यते मुनिशार्दूलदोषेणानेन भिक्षुकः
क्षत्रियाणां स्त्रियं गत्वा बहुशो भिक्षुको मुन् ५७
लक्षमेकं जपेत्तेन मुच्यते यदि प्रधा
वैश्यायां बहुशो गत्वा जपेन्मंत्रमनन्यथा ५८

अर्थलक्षं रहस्यं चेद्दोषान्मुच्येत भिक्षुकः
शूद्रायां बहुशो गत्वा जपेत्स्नात्वा यु++यु  ५९
मुच्यते बिक्षुको दोषाद्यदि न प्रधिता ++
ब्रह्मचारी वनस्थश्च यथा भिक्षुस्तथाचरेत्  ६०
भिक्षोर्यन्मुनिशार्दूलप्रायश्चित्तं मयोदितम्
तत्पादमाचरेद्दोषान्मुच्यते हि ग्रहाश्रये  ६१
प्रणवाद्यास्त्रयो वेदाः प्रणवे समवस्थिताः
अतः प्रणवनिष्ठानां न पापं विद्यते क्वचित्  ६२
अहो प्रणवमाहात्म्यं मया वक्तुं न शक्यते
सर्ववस्थांगतो वापि युक्तो वा सर्वपातकैः  ६३
मुच्यते सर्वपापेभ्यः प्रणवाभ्यासतत्परः
व्रतानि सर्वदानानि तपांसि च बहूनि च  ६४
वेदाभ्यासश्च यज्ञाश्च तीर्थयात्रा तथैव च
अन्यानि यानि कर्माणि विशिष्टानि श्रुतौ स्मृतौ  ६५
अस्याभ्यानेन तत्सर्वं  न समाविद्धि सुव्रत
बहुनोक्तेन किं ब्रह्मन्वदामि तवसादरात्  ६६
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित्
प्रणवो हि परं ब्रह्मप्रणवः परमं पदम्  ६७

ओंकारेणैव पोतेन संसाराब्धिंतरेद्द्विजः
प्रणवेन स्वरूपेण स्यात्मानं ब्रह्मपश्यति ६८
वर्णाश्रम परिभ्रष्टा येन रामूढचेतसः
तेऽपि पापार्णवं त्यक्त्वा ज्ञानं लब्ध्वा शिवं ययुः ६९
तस्मात्सर्वप्रयत्नेन प्रणवं सर्वदा मुने
अस्याभ्यानेन चात्मानमाश्रयान्यद्धृशंत्यमि ७०
इति वासिष्ठलैंगे उपपुराणे प्रणवरहस्यं नाम
सप्तमोऽध्यायः

अष्टमोऽध्यायः
ईश्वरः
दानं प्रतिग्रहश्चैव याजनं यजनं तथा
अध्यापनं चाध्ययनं मुने वेदांतवित्तम १
षट्कर्याणि विधीयंते ब्रह्मणस्य श्रुतौ स्मृतौ
षएणां तु कर्मणामस्य त्रीणि कर्माणि जीविका २
याजनाध्यापनेतद्वद्विशुद्धेभ्यः प्रतिग्रहः
क्षत्रियस्य च वैश्यस्य दानमध्ययनं तथा ३
यज्ञश्च धर्म इत्युक्तः क्षत्रियस्य विशेषतः

अन्याय वर्मिनांदंडो युद्धं चाकृत्रिमेण तु ४
कृषिर्वैश्यस्य धर्मस्स्याद्विश्शेषेण महामुने
उत्तमानां तु वर्णानां सम्यक् शिश्रूषणं तथा ५
शूद्राणां धर्म इत्युक्तस्संग्रहेण मया तव
चत्वार आश्रमाः प्रोक्ताः ब्रह्मचारी ग्रही वने ६
सन्यासी च मुने तेषामन्यो नास्ति श्रुतौ स्मृतौ
भिक्षाचार्या गुरोर्नित्यं शुश्रूषा च महामुने ७
स्वाध्यायश्च ततस्सम्ध्या कर्म ब्रह्मविदां वर
अग्निकार्यं समासेन कर्म स्याद्ब्रह्मचारिणाम् ८
पावस्यातिथेश्चापि ब्रह्मन्श्रद्धा पुरस्सरम्
अभ्यागतानां शिश्रूषा यज्ञो धानं शिवार्चनम् ९
ग्रहस्थस्य समासेन धर्मः प्रोक्तो मया तव
शाकमूलफलाशित्वं होमः स्वाध्याय एव च १०
संविभागश्च सर्वेषां धर्मोथवसनासिनाम् ११
नित्यकर्म परित्यागो वैराग्य परिपाकतः
भिक्षाशित्वं शिवध्यानं स्नानं संध्यानुभस्मना १२
आत्मज्ञानार्थमाचार्याद्वेदांतश्रवणं सदा
धर्मो यं भिक्षुकस्योक्तो मया वेदार्थवित्तम १३

ब्रह्मचर्यं वनस्थानां भिक्षुकाणां तथैव च
साधारणं मया प्रोक्तं तथा वै ब्रह्मचारिणाम् १४
स्वदारमात्रतो ब्रह्मन् ऋतुकाले तु मैथुनम्
पर्ववर्जग्रहस्थस्य ब्रह्मचर्यं प्रकीर्तितम् १५
एवं वर्णाश्रमाचारो मया प्रोक्तस्समासतः
श्रद्धया मत्प्रसादार्थं याजयंति जनाश्च ये १६
तेषां नास्ति महाघोरे नरके वर्तनं मुने
वर्णाश्रमसमाचाराद्भव संसारवर्तिनः १७
ज्ञानं मद्विषयं लब्ध्वा यांति मत्परमं पदम्
वर्णाश्रमसमाचारं विना वेदविदां वर १८
वांछंति मोक्षं ये मूढास्तेषां नास्त्यवनिष्कृतिः
पुरा शांडिल्य संज्ञस्तु ब्राह्मणः कश्चिदल्पवित् १९
वेदमार्गं परित्यज्य साहसी बुद्धिपूर्वकम्
परदारांत्समागत्य कृत्वा पापानि संततम् २०
वासुदेवं कुमार्गेण पूजयामास सुव्रत
ततो विश्वात्मको विष्णुः प्रादुरासीत्स्वमायया २१
तस्याग्रेनोपितं दृष्ट्वा पूजां चक्रे पुनः पुनः
ततो माया हरिब्रह्मन् शांडिल्यं प्रत्यबाव+ २२

धिक्धिक् शांडिल्य दुर्बुद्धे साहसित्वं ततो भृशम्
को वा वर्णाश्रमाचारं श्रौतं त्यक्तुं त्वया वि+ २३
शक्तः पापफला दन्योऽस्ति ते निष्कृतिः श्रुतौ
कुमार्गेणापि शांडिल्य कृता पूजाममत्वय २४
ततः कालेन महता वेदमार्गं गमिष्यसि
तस्मात्त्वं पांचरात्रोक्त वर्त्मना श्रद्धया सह २५
मामाराधयशांडिल्य ब्राह्मणानपि भक्तितः
इत्युक्त्वा भगवान् विष्णुस्तत्रैवांतरधीयत २६
शांडिल्योऽपि पुनब्रह्मन् पांचरात्रं तु वैष्णवम्
परिगृह्य पुनर्विष्णुं पूजयामास भक्तितः २७
पुनर्विष्णोः प्रसादेन वेदमार्तानुवर्तिनीम्
शांडिल्यस्संहितां चक्रे वैष्णवीं महतीं मुने २८
तस्यांचक्रुर्मुने दीक्षां पाषंडाः पावयोनयः
स्थापितायां तु शांडिल्यस्संहितायाममा++ २९
घनदंष्ट्राकराळास्याः क्रुद्धाः पाशधराः मुने
शूलहस्तामहाक्रूरनयनाः कृष्णविग्रहाः ३०
निघृणास्सततं ब्रह्मन् यमदूताभयंकरा+
बद्ध्वा पाशेन शांडिल्यं मार्गं निन्युस्सुदुर्घटम् ३१

अथोक्ताय मराजेन शांडिल्यं यमकिंकराः
मुद्गर्तः खड्गशूलाद्यैः पीडां चक्रुर्महामुने ३२
पुनश्चाह यमः क्रूरो रक्तघूर्णितलोचनः
दुष्टानामप्यशिष्टानां साधनं मातृवत्सदा ३३
प्राप्तये परिहाराय बाधिता च श्रुतेर्बलात्
बुद्धिपूर्वं परित्यक्ता तेन साक्षाद्दुरात्मना ३४
तस्मादेनं तु पापिष्ठं तत्पापविनिवृत्तये
रौरवादिषु सर्वेषु नरकेषु क्रमेण तु ३५
भोजयित्वा महादुःखान्यप्रसिद्धान्यनेकशः
अगच्छध्वं सहानेन शांडिल्येन दुरात्मना ३६
इति संचोदिता ब्रह्मन् यमदूता यमेन तु
तथैव च श्रुः पापिष्ठमब्दानामयुतत्रयम् ३७
पुनश्चैनं समादाय यमदूताय मंययु
तं दृष्ट्वा यमराजोऽपि प्राह गंभीरया गिरा ३८
भद्रं भद्रं त्वया भुक्तं कल्याणादिव दुस्सहाम्
पापानां फलमाश्चार्यं गच्छ विष्णोः परं पदम् ३९
इत्युक्तो धर्मराजेन शांडिल्योरधमास्थितः
स्वस्ति मंगळसंयुक्तः सुखं विष्णोः पदं गतः ४०

दृष्ट्वा शांडिल्यमनघं विष्णुर्भक्तहितेरतः
प्रसादमकरोत्तस्य पुनरेनमभाषत  ४१
भगवान्
वेदमार्गपरित्यागात्फलं भुक्तं त्वयानघ
मत्तंत्राश्रयणेनैव मत्पूजा चकृता त्वया  ४२
तथाहं प्रीतवानस्मि तव शांडिल्य मे प्रिय
भूयोऽपि मत्प्रसादेन कर्मलोके द्विजोत्तम  ४३
भूत्वो वर्णाश्रमाचारं श्रौतं कृत्वा यथा बलम्
मद्भक्त्यातीवसंयुक्तो ममाराधनतत्परः  ४४
साक्षाद्ब्रह्मैव विज्ञानं लब्धवान्प्रीतितो भव  ४५
ईश्वरः
इत्युक्तो विष्णुना ब्रह्मन् शांडिल्यो भुवि जातवान्
ब्रह्मणानां कुले शुद्धे साक्षादग्निसमो मुन्  ४६
न पुनर्वामदेवस्य प्रसादेन महामुने
ब्रह्मचर्याश्रमः स्थित्वा वेदं सर्वमधीतवान्  ४७
पुनः स्नात्वा ग्रही भूत्वा शांतस्सत्यपरायणः
++++++++++++++++++++++
प्रणष्टपापश्शुद्धात्मा ब्रह्मज्ञानी सदा शुचिः

अनित्यमीश्वरादन्यदिति ज्ञात्वा प्रसादतः ४८
विरक्तस्सर्वलोकेभ्यस्त्यक्त्वा सर्वाणि सुव्रतः
आचार्याच्छ्रुतवेदांतो मत्प्रसादान्महामुने ४९
सर्वलोकविधातारं सर्वज्ञं सर्वकारणम्
सत्यबोधसुखानंदमादिमध्यांतवर्जितम् ५०
अप्रमेयमनौपम्यमनिर्देश्यं शिवाभिधम्
मामपश्य दयत्नेन मुने स्वात्मतया सदा ५१
प्रारब्धकर्म प्राबल्या प्रपंचप्रतिभासतः
अमुक्तो भुक्तवान्भोगान् कंचित्कालमनादृतः ५२
सपुनः कर्मणामंते निवृत्तो विश्वमायया
एवं वर्णाश्रमाचाराद्वेदसिद्धादयत्नतः ५३
शांडिल्योऽपि विमुक्तोभूत्तच्छिष्याश्चैवमेव हि
बहवोनेन मार्गेण मत्यामिद्रूपमागतः
वेदमार्गं विना ब्रह्मन् नास्त्युपायो विमुक्तये ५४
धर्मशास्त्राणि वेदांगान्युपवेदास्तथैव च
पुराणानि तथा सांख्ययोगः पाशुपतं तथा ५५
देशजाति कुलानां च धर्मश्चान्ये महत्तराः
सर्ववेदा विरोधेन प्रमाणं चान्यधा भवेत् ५६

या वेदबाह्याः स्मृतयो याश्च काश्च कुदृष्टयः
सर्वास्ता निष्फलाः किं च प्रत्यवायस्य हेतवः ५७
तस्मात्सर्वप्रयत्नेन ब्रह्मन्ब्रह्मविदां वर
त्यक्त्वा वेदविरुद्धानि वेदमेकं समाश्रयेत् ५८
इति परमेश्वरवाक्यमभीष्टं श्रुतिवचनेन समं हृदि कृ-
जितहृदयः प्रतिवंद्य महेशं श्रुतिमहिमानववसिष्ठः ५९
इति वासिष्ठलैंग्ये वर्णाश्रमविधिर्नाम अष्टमोऽध्यायः

नवमोऽध्यायः
युगश्चतुर्विधः प्रोक्तः कालतत्वविशारदैः
तेषामाद्यं कृतं विद्धि ततस्त्रेतायुगं मुने १
तृतीयं द्वापरं विद्धि ततः कलियुगं तथा
ब्रह्माकृतयुगस्यैव देवता परिकीर्तिता २
रविस्त्रेतायुगस्योक्तो द्वापरस्य मुने हरः
रुद्रः कलियुगस्यापि चतुर्णामपि देवताः ३
आद्यं सत्वगुणो द्रिक्तं विद्धि वेदविदां वर
त्रेता सत्वरजोमिश्रा द्वापरं राजसंमुने ४
चतुर्थं तामसं ब्रह्मन् विद्धि वेदार्थवित्तम

एको धर्मस्सदा शुद्धो वृषभो मम वाहनः  ५
आद्ये युगे चतुष्पादस्थितस्त्रेतायुगे त्रिभिः
पादाभ्यां द्वापरे ब्रह्मन् कलौ पादेन तिष्ठति  ६
आद्ये बलं द्विजस्यास्ति द्वितीये क्षत्रियस्य तु
तृतीये बलवान्वैश्यश्शूद्रस्तु बलवान्कलौ  ७
कृते ध्यानं तपश्चैव कर्तुं  शक्यमयत्नतः
ज्ञानयोगमुने शक्यौ त्रेतायामप्रयासतः  ८
द्वापरे शक्यते कर्तुं  यागः क्लेशेन सुव्रत
दानमेवकलौ कर्तुं  कर्तुं  सर्वजनैस्सदा  ९
आद्ये पूर्णायुषस्सर्वे सदा तृप्ता हिते रताः
रूपयौवनसंपन्नास्समास्सर्वे सदामुने  १०
त्रेतायां कलहश्चाल्पः जायते सर्वदेहिनाम्
क्षुत्पिपासाच वैषम्यं स्वल्पं विप्रेषु जायते  ११
द्वापरे जायते लोभः क्रोधश्च धनहीनता
पुण्यकर्मप्रवृत्तिश्च भूयो भूयोपि जायते  १२
कलौ निन्दति विद्वांसं ब्रह्मनिष्ठमकारणात्
विरक्तं चापि निंदंति नरास्सर्वत्र सर्वदा  १३
धर्मिष्ठं तु सदा ब्रह्मन् बाधं ते सर्वजंतवः

ब्रह्मणं क्षत्रियं वैश्यं घ्नन्ति नीचा महामुने १४
मायापि त्वमसूया च डंभोदर्पश्च सुव्रत
कामः क्रोधश्च लोभश्च मोहो सत्यं सदा नृणाम् १५
वर्तते सर्वदा क्लेशो व्यादयश्चाधयस्तथा
केचिद्रुद्रं समाश्रित्य विष्णुं निंदंति वैष्णवान् १६
अन्ये विष्णुं समाश्रित्य निंदंतीश्वरमव्ययम्
केचिद्ब्राह्मणवावित्वं केचिन्निंदंति वै मुने १७
अर्थश्च रूपहीनश्च विद्याहीनं महामुने
अर्थहीनं च निंदंति धनवंतो महामुने १८
अनावृष्टि भयश्चैव सस्यनाशस्तथैव च
अपहारश्च वित्तानां भूयो भूयोऽपि जायते १९
देवताः प्रतिमाः क्रोधान्नराश्चोत्पाटयंति च
अवमानं च कुर्वं ति प्रतिमायामनादरात् २०
ब्रह्मणाः क्षत्रियावैश्या निंदया ब्रह्मवित्तम
त्यजंति स्वाश्रमामोहाद्दुराचारा भवंति च २१
नाश्रयंते नरावेदान् श्रद्धया मुक्तये मुने
जीवनार्थं प्रतोपायं कुर्वं ति परिमो हिताः २२
लेखनं पुस्तके केचित् श्रुतेः कुर्वं ति मोहिताः

ब्राह्मणाः क्षत्रियावैश्या न जीवंति कलौ मुने २३
अन्या येन धनं ब्रह्मन् संपाद्य भुवि मानवाः
यजंति श्रेयसे नित्यं श्रद्धया न कदाचन २४
ब्राह्मणाः क्षत्रिया वैश्याश्शूद्रशिष्यभदंति च
त्रैवर्णिका मुने शूद्रं सेवं ते धनवांछया २५
संभाषणं सदा शूद्रैः स्पर्शनं भोजनं सदा
कुर्वं ति ब्राह्मणा वैश्या राजानं च दिने दिने २६
शूद्रं राजानमाश्रित्य मंत्रिणश्च भवंति हि
ब्राह्मणा निर्घृणा नित्यं बाधयंति महामुने २७
स्नानहीना बुभुक्षंते जपहोमादिवर्जिताः
देवता राधने नित्यं भवंति विमुभा मुने २८
उद्धूळनं त्रिपुंड्रं च भस्मना वेदमंत्रतः
न करिष्यंति मोहेन युगांते समुपस्थिते २९
अन्यानि यानि कर्माणि श्रौतानि मुनिसत्तम
++र्तानि न करिष्यंति कलौ ब्रह्मन् नरास्सदा ३०
आम्नायं धर्मशास्त्रं च पुराणं भारतं मुने
जपमात्रमति ब्रह्मन् वदिप्यंति कलौ नराः ३१
आश्रौतमूर्ध्वपुंड्रं च ललाटे श्रद्धया सह

धारयिष्यंति मोहेन युगांते समुपस्थिते ३२
अंकिताश्च भविष्यंति देवता युधलांचनैः
नराणामनुरूपाय युगांते समुपस्थिते ३३
कुर्वं तु श्रौतकर्माणि श्रद्धया मुनिसत्तम
स्वधर्मैभिरुचिर्नास्ति ब्राह्मणानां कलौ युगे ३४
पांचरात्रं प्रशंसंति केचिद्भागवतं मुने
केचित्कापालमिच्छंति केचित्पाशुपतं मुने ३५
केचिद्बौद्धं प्रशंसंति तथा केचिद्दिगंबरम्
केचिल्लोकाय तं ब्रह्मन् केचित्सोमं महामुने ३६
लाकुळं केचिदिच्छंति तथा केचित्तु भैरवम्
केचिद्वायं प्रशंसंति केचिच्छात्कं तथैव च ३७
शांभवं केचिदिच्छंति यामळं भुवि केच+
अन्यानि यानि शास्त्राणि विरुद्धानि महामुने ३८
स्वतः प्रमाणभूतेन वेदेन मुनिसत्तम
तान्येव श्रद्धया युक्ताः परिगृह्य द्विजातयः ३९
आचरंति महाधीरा युगांते समुपस्थिते
शुक्लदन्ता महाधीरा मुंडाः काषाय धारिणः ४०
शूद्रा धर्मं चरिष्यंति युगाग्निं ते समुपस्थिते

वेदविक्रयिणः केचित्तीर्थविक्रयिणः परे ४१
यज्ञविक्रयिणः केचित्तपो विक्रयिणः परे
देवविक्रयिणः केचित्तैलविक्रयिणः परे ४२
क्षीरविक्रयिणः केचिदाज्यविक्रयिणः परे
धान्यविक्रयिणः केचिज्जलविक्रयिणः परे ४३
कन्याविक्रयिणः केचित्पशुविक्रयिणः परे
मांसविक्रयिणः केचित्सुराविक्रयिणः परे ४४
पुत्रविक्रयिणः केचिद्दारविक्रयिणः परे
भ्रातृविक्रयिणः केचिद्भविष्यंति कलौ नराः ४५
ब्राह्मणान्पादयोर्बध्वा हस्तयोर्निगळेन तु
पीडयंति सदा शूद्रा धनार्थं राजसेवकाः ४६
उच्चासनस्थान् शूद्रांस्तु भूमौ स्थित्वा द्विजास्सदा
स्वस्ति मंगळयुक्ताभिर्वाग्भिर्नित्यं स्तुवंति च ४७
क्षयंते च द्विजाश्शूद्रान् मुने राजोपसेविनः
शूद्राणां द्वारि सेवार्थं तिष्ठंति ब्राह्मणास्सदा ४८
अध्यापयंति शूद्रांश्च ब्राह्मणा वेदवित्तमाः
पठंति वैदिकानर्थान् शूद्राणामर्थसिद्धये ४९
परदाररतास्सर्वे भविष्यंति सरास्सदा

परभर्तृ रतास्तद्वत् स्त्रियस्सर्वाः स्वभावतः ५०
मंत्रौषधं समाश्रित्य दर्शयित्वा फलानि तु
वेदमार्गपरिभ्रंशं करिष्यंति कलौ नराः ५१
किमत्र बहुनोक्तेन वसिष्ठमुनि सत्तम
मर्यादा बिभ्यते लोके लौकिकी वैदिकी तथा ५२
वेदमार्गप्रतिष्ठार्थं कृपयाहं महामुने
सनकादिमुनींद्रेभ्यो दास्यामि ज्ञानमुत्तमम् ५३
विष्णुश्च लोकरक्षार्थं मूर्तिमाविश्यकामपि
राक्षसा नखिलान् हत्वा स्वस्वरूपं गमिष्यति ५४
मन्नियोगाद्धरिस्साक्षादतीवे श्रद्धया सह
कृष्णाद्वैपायनो भूत्वा ब्रह्मचारी जितेंद्रियः ५५
वेदांतानां प्रतिषार्धं मुने सूत्रं करिष्यति
जैमिनिर्व्यासशिष्यस्तु ममाज्ञावशमार्गतः ५६
कर्म कांडप्रतिष्ठार्थं ग्रहस्थो नियतव्रतः
यज्ञदानजपैर्युक्तः स्वयं सूत्रं करिष्यति ५७
उभाभ्यां संस्थिते लोके वेदमार्गो भविष्यति
वैदिके सुस्थिते मार्गे स्थितं सर्वं भविष्यति ५८
तस्मात्सर्वप्रयत्नेन कलिदोषनिवृत्तये

वेदमार्गे सदास्थित्वा मोक्षकामनया द्विज ५९
कृत्वा कर्मयथा शक्तिज्ञानेच्छायास्ततः परम्
त्यक्त्वा सर्वाणि कर्माणि ज्ञानाभ्यासपरो भवेत् ६०
ज्ञानाभ्यासान्महापापान्मुच्यते नात्र संशयः
यथा दावानले क्षिप्ते तृणं पर्णं च दह्यते ६१
अ ++ मप्यभिलं पापं ज्ञानाग्निर्दहति क्षणात्
कुर्वाणोऽपि च कर्माणि कदाचिदपि यः पुमान् ६२
श्रद्धाहीनोऽपि वेदांतश्रवणे यदि यत्नवान्
नास्ति तस्य भयं किंचित्कलिदोषश्च नश्यति ६३
अभोज्य भोजनो वापि कुत्सिताचारवानपि
ज्ञानाभ्यासपरो विप्र सर्वपापैः प्रमुच्यते ६४
उदितं च्चेत्परं ज्ञानं ब्रह्मैव भवति स्वयम्
पुण्यपापप्रसंगोऽपि नास्ति ज्ञानात्परं मुने ६५
सर्वमात्मतया दृष्टं यतस्तस्माद्द्विजोत्तम
अल्पाया सोमहानर्थनाशकस्सर्वसौख्यदः ६६
ज्ञानाभ्यासो यतस्तस्मात् ज्ञानमेव सदा भ्यसेत्
मूककुंभो यथा तोये क्षिप्तकालेन सुव्रत ६७
पूर्णकुंभो भवेत्तोयात्तद्वत् ज्ञानेन मानवः

यथाग्निस्तृणकाष्ठादि संयुतो मंदिरस्थितः ६८
मंदिरं दहति ज्ञानं तद्वदज्ञानमंदिरम्
नीचा विकन्यका राज्ञा गृहीता महिषी भवेत् ६९
सापुनर्नवमानार्हा पूज्यैवं भुवि मानवैः
तद्वत् ज्ञानेन राज्ञाया गृहीतो भुवि मानवः ७०
न पुनर्नवमानार्हः पूज्य एव सुरासुरैः
ज्ञाना++ स फलस्यास्य विनाशो नास्ति सर्वदा ७१
तस्माद्वेदांतवाक्यानामभ्यासस्सर्वदोषहृत्
अथवा योनरोगत्वापुरीं वाराणसीं पुनः ७२
श्रद्धा विनयसंपन्नः प्रणम्य मणिकर्णिकाम्
तस्यां स्नात्वा महादेवं साक्षाद्विश्वेश्वरं प्रभुम् ७३
दृष्ट्वा प्रणम्य देवेशं समाराध्य यथा बलम्
उपोष्य दिनमात्रं वा मुच्यते कविदोषतः ७४
अथवा ब्रह्मविच्छ्रेष्ठ यो नरः श्रद्धया सह
सुवर्णमुखरीं गत्वा स्नात्वा तस्यामुपोषितः ७५
श्रीकाळहस्तिनाथं मां दृष्ट्वा भक्त्या प्रणम्य च
विसृज्य कलिजाद्दोषान्मुच्यते भवबंधनात् ७६
अस्मादन्यं मुने नास्ति स्थानं संसारनाशनम्

अत्र ब्रह्मविदां श्रेष्ठ यत्किंचिच्छिवयोगिने ७७
ददाति यः पुमान् भक्त्या नयाति परमां गतिम्
विषुवायनकालेषु यदत्रशिवयोगिने
दत्तं तदक्षयं प्रोक्तं धार्मिकैर्वेदपारगैः ७८
वाराणस्यां प्रदत्तं यत्तत्तत्सहस्रगुणाधिकम्
अत्र दत्तमसंख्यातं कलिदोषस्य नाशनम् ७९
तस्मादेतत्प्रयत्नेन भजेत्स्थानं नरोत्तम
अत्र मुक्तिमतां नृणां नास्ति लोकत्रयेष्वपि ८०
भीतिस्तस्मान्नरो भक्तिं कुर्यादत्रैव सर्वदा
अत्र देवमदृष्ट्वा यो मुक्तिमिच्छति सुव्रत ८१
सोंनं त्यक्त्वा विषंभुङ्क्ते क्षुधार्तः क्षुन्निवृत्तये
इति तव परमरहस्य मुक्तं श्रुतिशिरसि स्थितमादृतं
मया ८२
मुनिवरसंघपरं परागतं परिहरणीयमिदं त्वया मुने ८३
इत्युपपुराणे वासिष्ठलैंग्ये युगधर्मो नाम नवमोऽध्यायः

## दशमोऽध्यायः

ईश्वरः

पुराकल्पं तरे ब्रह्मन्देवदारुवने शुभे
सर्वसिद्धसमाकीर्णे देवदानवसेविते १
दापीकूपतटाकाद्यैस्सविद्भिसमलंकृते
फलमूलसमाकीर्णे पर्वतैश्च समावृते २
भृग्वंगिरो वसिष्ठाश्च विश्वामित्रश्च गौतमः
पुलस्त्यपुलहश्चात्रिस्सुकेतुश्च क्रतुस्तथा ३
मारीच काश्यपश्चापि संवर्तस्संगवानजः
काकुस्थश्च कालभद्रश्च काकोलूकः कणप्रियः ४
किरीटरुद्रभक्तश्च किंकिणः किं शुकप्रियः
आदित्य पर्ण आयुष्मान् ++ दुरति क्रमः ५
वृषभो दुंदुभिर्दुधो दूतो दुश्शीलवानपि
सुमंतुः कौशिकः कणवः कंकणादिमहर्षयः ६
चत्वारिंशत्सहस्राणि तथैवाष्टसहस्रकम्
तपश्चक्रुर्महाप्राज्ञ कृछ्रचांद्रायणादिभिः ७
यजंति यज्ञैर्विविदैरीश्वरं श्रद्धया सह
अहंतेषां मुनींद्राणां माया पाशनिवृत्तये
आत्मज्ञानप्रदानार्थं देवदारुवनं गतः ८
कल्याणवेषमास्थाय मन्माया शक्तिवैभवात्

विष्णुश्च मायया नार्यो मोहिता मुनिपुंगव ९
त्यक्तवस्त्रा मुने काश्चित्काश्चित्त्यक्तविभूषणाः
काश्चिन्मां वीक्ष्य तिष्ठंति काश्चिदालिंगनोत्सुकाः १०
काश्चिन्मांभुंक्ष्वभुंक्ष्वेति प्रोच्च्या धावन्ति मां प्रति
महर्षीणां सुतास्तेषां मम भार्यां सुशोभनाम् ११
दृष्ट्वा मन्मथविद्धांगां निर्लज्ञा विवशाभृशम्
त्यक्तवस्त्रास्समालिंग्य भूक्तवत्यो बलान्मुने १२
केचिन्नृत्यंति मोहेन मतभ्रूविलासिनः
स्त्रियः केचित्करास्फोटं कुर्वं ति परिमोहिताः १३
एवं नराणां नारीणां कुलं भ्रांतं महामुने
तान्दृष्ट्वा मुनयस्सर्वे कुपिता मां प्रियाश्चये १४
अतीवपरुषं वाक्यं प्रोचुर्मां प्रति सुव्रत
शेपुश्शापैर्मां ब्रह्मन् मायया मम मोहिताः १५
महाघोरैर्महामंत्रैराभिचारं च चक्रिरे
तत्सर्वं विफलं ब्रह्मनभून्मय्या ज्ञया मम १६
ते संभूयमुनिश्रेष्ठ मामुपेत्य महामुने
पृष्टवंतो भवान् कस्त्वं किमुद्दिश्य समागतः १७
इत्युक्ते पितैरुक्तं मया ब्रह्मविदां वर

ईदृशो हमिति प्राज्ञाः पुनर्वक्ष्याम्य संशयम्
इदानीं भार्ययासार्धं तपः कर्तुमिहागतः १८
इति मद्वचनं श्रुत्वा मुनया मुनिपुंगव
प्रोचुर्धिक्धिङ्महामूढवस्त्रेणाच्छाद्य विग्रहम् १९
त्यक्त्वा भार्यां महादुष्टं मोहयंतीं तपश्चरान्
इति तेषां वचः श्रुत्वा मम भार्या पतिव्रत २०
न कदाचिदियं दुष्टानबुध्याप्यन्यमिच्छति
इत्युक्ते च मया ब्रह्मन् ब्राह्मणा मम मायया २१
संभूयातीवसंरुष्टाः परुषं वाक्यमब्रुवन्
गच्छ गच्छ महादुष्ट भार्या ते व्यभिचारिणी २२
त्वं च वर्णाश्रमाचार विहीनो बुद्धिपूर्वतः
नान्यमिच्छति ते भार्येत्यसत्यं भवतेरितम् २३
इत्याकर्ण्यवचस्तेषां सत्यमेवेरितं मया
मद्दृष्ट्या मम भार्ये यं मामेवेच्छत्य विक्रिया २४
रागद्वेषं भयक्रोधलोभमोहादिवर्जिता
पुण्यपापविनिर्मुक्ता सर्वदा परमार्थतः २५
अहं च सर्वदा विप्रा वर्णाश्रमविवर्जितः
न कर्ता च न भोक्ताहं न च कारयिता तथा २६

धर्मधर्मौ न मे विप्रास्सर्वदा परमार्थतः
भवता वात्मविज्ञानं अशेषक्लेशनाशनम्  २७
नास्ति देहात्मबोधेन कृतं कर्माखिलं सदा
मांसदृष्ट्या विलोक्यैनां मां च वेदविदां वराः  २८
दूषणान्युक्तवंतस्तु श्रूयंतन्नास्ति मे सदा
इति मद्वचनं श्रुत्वा मुनयः क्रोधमूर्च्छिताः  २९
सर्वे विचार्य संभूय मामेवं पुनरभुर्वन्
अहो विरुद्धं भवता प्रोक्तं चोरेण साहसात्  ३०
न कर्ता न च भोक्ताहं पुण्यपापविवर्जितः
वर्णाश्रमविनिर्मुक्तस्तपः कर्तुमिहागतः  ३१
इत्युक्ता मुनयस्सर्वे मायया मोहिता मम
लोष्ठैश्च मुष्टिभिर्दंडैस्ताडयां चक्रिरे भृशम्  ३२
परिभूतेन तैर्ब्रह्मन् मया भिक्षाटनं कृतम्
दृष्टा पूर्ववसिष्ठस्य भार्यातीव पतिव्रता  ३३
अरुंधतीति विख्याता यथा नाम्ना तथा नघ
साप्रणम्य महाभक्त्या प्रत्युद्गम्य तपस्विनी  ३४
प्रक्षाळ्य पादौ तोयेन दत्वा चासनमादरात्
संप्रोक्ष्य शिथिलं देहं अभिघातं द्विजोत्तमैः  ३५

संधयामास भैक्षाद्यैर्दत्वा भैक्षं यथाबलम्
पुनश्च प्रणम्यैवमब्रवीद्वचनं सती ३६
को भवान् कुत आयातः किमाचारो भवानिति
अहमप्युक्तवानेवं कृपया केवलं मुने ३७
नाहं देवो न गंधर्वो न यक्षो न च राक्षसः
नम नुष्यो न सर्पश्च न पशुर्न च पक्षिणः ३८
न च शब्दो न च स्पर्शो न च रूपरसादयः
नाहं पृथ्वी न सलिलं न च वह्निर्न चानिलः ३९
न चाकाशो न च प्राणो न बुद्धिर्नेंद्रियाणि च
न कर्ताहं न भोक्ताहं न वर्णीनाश्रमी सदा
न च विद्वान् सदा विद्वान् असाध्यो हंन साधनम् ४०
न साधकोहं कल्याणीं सिद्धानां प्रवरोस्म्यहम्
नागतो हं महाप्राज्ञे व्योमवत्सर्वगस्सदा ४१
तथापि मंडलात्तस्मात्साराद्वेदमयादहम्
तथाप्यस्माज्ज्वलं लिंगात्कैलासादागतो स्म्यहम् ४२
आगतो लीलया सार्धं नम स्वधर्मचारिणी
स्वच्छंदवृत्तिराचारो मम चास्याश्च सुंदरि ४३
त्वं च मामपि विद्ध्येवं मम वाक्यपरिग्रहात्

प्रसन्नोऽहं तवातीव गात्रशिश्रूषया सह ४४
इत्युक्त्वा तामहं ब्रह्मननु+ह्यगृहांतरम्
अगमं भार्यया सार्धं भिक्षार्थं ++नि सत्तम ४५
गच्छंतं मुनयो दृष्ट्वा प्रोचुर्मां परिमोहिताः
तिष्ठ तिष्ठ सदा स्त्रीणां मोहनं पुरुषाधम ४६
लिंगमेतत्समुत्पाट्य वनेस्मिन् भार्यया विना
ततो लिंगं समुत्पाट्य तत्रैवांतर्हितो भवम् ४७
मूललिंगे वंशमध्ये रहस्य प्रणवात्मके
ते मां च मम भार्यां च नापश्यन्मुनयो मुने ४८
उत्पताभूत्ततसर्वलोकानां च भयंकरः
न तदा राजते सूर्यो न चंद्रो नापि पावकः ४९
भूकंपश्च समुद्भूतो मंत्रास्तेषां न भांति च
एवं संक्षोभितेरण्ये मुनयस्संशितव्रताः ५०
परस्परं समालोक्य ब्रह्मलोकं समाययुः
तस्मिन्दिव्यासनासीनं सूर्यकोटी समप्रभम् ५१
ब्रह्माणं मुनयो दृष्ट्वा स्तोत्रैः स्तुत्वाभिवाद्य च
ज्ञापयां चक्रिरे सर्वे मुनयो मुनिपुंगव ५२
ऋषयः

कश्चित्सभार्यश्शांतात्मानग्नो विकृतवेषधृक्
वर्णाश्रमविनिर्मुक्तो देवदारुवनं गतः ५३
मोहयामास सौंदर्व्यान्नारीणां कुलमाशुनः
तस्य भार्या च सौंदर्याद्दूषयामास पुत्रकान् ५४
दत्ताश्शापाः परं धामन् ते च शापाः पराहताः
आभिचारः कृतो स्माभिस्सोपि दैवपरा हतः ५५
अस्माभिर्मुष्टिभिर्दंडैस्ताडितश्च परात्परः
स्वकीयं लिंगमुत्पाट्य त्यक्तकार्यो भुवीश्वर ५६
तत्रैव भार्यया सार्थं क्षणादंतर्हितो भवत्
उत्पाताश्चाभवन् देववयं भीताः स्म शंकर ५७
को यं स भार्यः पुरुषो देवदारुवनं गतः
भवंतुमेव शरणं प्रसन्नवयमीश्वर ५८
कारुण्यतस्ततो स्माकं ब्रूहि सर्वज्ञशाश्वत
ईश्वरः
एवं विज्ञापितो ब्रह्म ध्यात्वा मंत्रिपुरांतकम् ५९
स्तोत्रैः स्तुत्वा पुनर्बुध्या मुनिभ्यः प्रत्यभाषत
ब्रह्म
अहो महेश्वरस्साक्षात्सर्वलोकैकनायकः ६०

स विष्णुनाभुवं प्राप्तो देवदारुवनं बुधाः
भाग्यहीनभवंतोऽपि दृष्ट्वापि परिमोहिताः ६१
भवद्भिः किं कृतं कर्म भवद्भिः किं श्रुतं वृधा
जन्मांतरसहस्रेषु कृतं पुण्यफलं द्विजाः ६२
अग्नौ विसृज्य मां प्राप्ता वृधाहोमोहवैभवात्
यस्माज्ञातं जगत्सर्वं यस्मिन्नेव विलीयते ६३
तमागतं शिवं दृष्ट्वा कथं मूढैरुपेक्षितम्
वातादयोभयाद्यस्य स्वकार्ये च निरंतरम् ६४
प्रवर्तं ते स ईशानः हाभवद्भिरुपेक्षितम्
यमसाद्यनिवर्तं ते विकल्पामोहसंभवाः ६५
तस्याभिचारो मोहेन हाभवद्भिः कृतो द्विजाः
कामक्रोधमहामोहविषवेगस्य भेषजम् ६६
आगतं वेदकांताराद्धाभवद्भिरुपेक्षितम्
ध्यायंति योगिनो नित्यं हृदये यं जितेंद्रियाः ६७
तमागतं समासाद्य हाभवद्भिरुपेक्षितम्
यस्तु पूर्वं जगत्साक्षी नित्यनंदो निरंजनः ६८
तमागतं स्वयं मूर्खैर्हाभवद्भिरुपेक्षितम्
एष ब्रह्मैष एवेंद्रो एष एव प्रजापतिः ६९

एष धाता विधाता च सर्वात्मा सर्ववर्जितः
शिवो रुद्रो महेशानश्शंकरः ब्रह्मसंज्ञितः ७०
अभिधानाभिदेयादि भावहीनो निरास्पदः
प्रत्यङ्नात्रस्सदास्वस्य भासासर्वावभासशः ७१
सर्ववस्तुतयासाक्षात्स्वयमेव विजृंभितः
सर्वक्लेशविनिर्मुक्तः श्रीमत्पंचाक्षराश्रयः ७२
कृपया केवलं विप्रा अमूर्तो मूर्तिमाश्रितः
देवदारु वनं प्राप्तो विष्णुना विश्वयोनिना ७३
तमेव मुक्तिदं बुध्वा व्रजेतशरणं बुधाः
इतः पूर्वं कृतं कर्म भवद्भिरखिलं मुदा ७४
लिंगार्चनं विना तेन मोहिता देवमायया
तस्माद्भवद्भिर्यद्दृष्टं लिंगं भूमौ निपातितम् ७५
तल्लिंगसदृशं लिंगं कृत्वा श्रद्धा पुरस्सरम्
पंचाक्षरेण मंत्रेण प्रणमेन सहादरात् ७६
पूजयध्वं स पत्नीकास्स पुत्रैरखिलैस्सह
श्रीकाळहस्तिशैलाख्ये स्थाने सर्वार्थसाधके ७७
माखमासे मखर्क्षे तु पर्वयुक्ते द्विजोत्तमाः
सुवर्णमुखरी पुण्य नदी यत्र स्थिता सदा ७८

यस्यांगं गामखर्क्षे तु स्नात्वा पूता स्वभावतः
यस्यांगो दावरी स्नात्वा विमुक्ता पापपंजरात् ७९
यस्यामन्यानि तीर्थानि स्नात्वा मुक्तानि पाप्मभिः
तस्यां स्नात्वा मुनिश्रेष्ठा जितक्रोधा जितेंद्रियाः ८०
श्रीकाळहस्ति शैलेशं शीघ्रं संसारमोचनम्
दृष्ट्वा प्रदक्षिणं कृत्वा प्रणम्य भुवि दंडवत् ८१
यथा शक्तिधनं दत्वा श्रद्धया शिवयोगिने
ब्राह्मणेभ्यो धवानेभ्यो दिनमेकमुपोषिताः ८२
पुनः स्वमाश्रयं गत्वा पूजयध्वं महेश्वरम्
देवदेवो महादेव त्साक्षात्सर्वफलप्रदः ८३
ऐश्वर्यं परमं ज्ञानं लब्ध्वा वेदांतवाक्यजम्
छित्वा मायां महानंदं भजध्वं मोक्षसंज्ञितम् ८४
ईश्वरः
इत्युक्ता मुनयो ब्रह्मन् ब्राह्मणाः परमेष्ठिना ८५
प्रणम्य दंडवद्भूमौ ब्रह्मणं गद्गदस्वराः
स्तोत्रैः स्तुत्वा महा भक्त्या समस्कृत्वा पुनः पुनः ८६
श्रीकाळ हस्तिशैलाख्यं स्थानं ते मुनयागताः
पुनर्ब्रह्मन् मुनिश्रेष्ठाः स्थानेऽस्मिन् परमेश्वरम् ८७

दृष्ट्वा भूमौ प्रणम्येशं त्रिः कृत्वा तु प्रदक्षिणम्
लौकिकैर्वैदिकैः स्तोत्रैः स्तुत्वा भक्तिपराद्विजाः ८८
दिनमेकमुपोष्यास्यां स्नात्वा नद्यां समाहिताः
दत्वा हिरण्यं गां भूमिफलं मूलं च भक्तितः ८९
श्रीकाळहस्तिनाथाय विदुषे ब्राह्मणाय च
इह जन्म कृतात्पापाद्विमुक्ताः परमर्षयः ९०
पुनराश्रममागत्य वसिष्ठमुनि पुंगवाः
शैललिंगं समादाय स्वदारैः स्वसुतैस्सह ९१
श्रीमत्पंचाक्षरेणैव सतारेण समहिताः
पूजयामासुरीशानं कृत्वा पाशुपतं व्रतम् ९२
एवं चिरगते काले तेषां रक्षार्थमादरात्
भस्मोद्धूळितसर्वां गस्त्रिपुंड्रां कितमस्तकः ९३
उमया सहितश्शक्त्या मुने विद्या स्वरूपया
नग्नो नृत्तप्रियश्चाहं हसन् ब्रह्मन् क्वचित्क्वचित् ९४
स्वच्छंदवृत्तिर्भिक्षार्थं देवदारुवनं गतः
मां भिक्षमाणं मुनयश्च दृष्ट्वा स्मृत्वा
सरोजासनवाक्यमीशः ९५
इहागतो मां करुणानि धानमित्यब्रुवन्मे मुनयः प्रणम्य

९६

भक्त्या ममांघ्रिं भवनाशहेतुरसमस्तदेवानुरमौशिपुष्पम्

प्रगृह्य मस्तैरवशामुनींद्रास्स पुत्रदारास्सविलार्द्रनेत्राः

९७

क्षमस्वदेवेशकृपालयानि शंकृतंतवास्माभिरनिष्टमातुरैः

भवार्णवेमग्नजनानरक्षकानतीवकष्टाननुगृह्यमोहितान्

९८

इति द्विजेंद्रास्सह बंधुबांधवैस्सदारपुत्रैश्च तपो धनेश्वरः

प्रकल्प्य पूजां महतीं प्रचक्रिरे

स्वमूर्ध्निविन्यस्तममांघ्रिमादरात् ९९

ततोऽहमास्थाय निजंवपुर्मुने त्रिलोचनं

सांबवमोचमंजसा

विशुद्धविज्ञानमनादिमुक्तिदं मुनिभ्य आम्नाय

वचोभिरादरात् १००

अणोरणीयानहमेव संततं वंहानहं विश्वमहं मुनीश्वराः

पुरातनोऽहं पुरुषोऽहमीशिता हिरण्मयोऽहं शिव एव

केवलः १०१

अपाणि पादोऽहमचक्षुरादिमान् तथापि पश्यामि

श्रुणोमि सुव्रताः
अहं विजानामि समस्तमात्मना न चास्ति
वेत्ताममबोधरापतः १०२
मुनिवेदैरनेकैरहमेव वेद्यो वेदांतकृद्वेदविदे वचाहम्
विहा पुण्यपापे मम जन्मनास्ति नाशो न देहे न च
बुद्धिरस्ति १०३
मुखे चास्ति वर्णाश्रमताशरीरतो न कर्तृता कर्मफलेषु
भोक्तृता
नमे सदा कारयितृत्वकल्पना न चास्ति शब्दोऽपि
जगन्मये मयि १०४
न चास्ति माया मम वेदवित्तमाः
स्वयंप्रभस्सर्वजगत्प्रकाशकः
अरंगरूपोऽहमतीवनिर्मलस्सुखैकविज्ञानघनस्वभावतः
१०५
यथैवदंडादिषु सर्वकल्पना यथैव
शुक्तारजिताविकल्पना
तथैव मय्यर्थितमात्ममायया समस्तदृश्यं
जगदागमैरिताः १०६

देहात्मबोधेन समस्तजंतवः कर्माणि कुर्वं ति

फलाभिलाषिताः

नमे शरीरात्ममतिः स्वभावतस्ततो न कर्तव्यमिहास्ति

किंचन १०७

एकोऽहमीशः प्रथमं मुनींद्रा वर्तामि पश्चादपि संभवामि

अतो न मत्तः पृथगस्ति

किंचिद्विचार्यमाणेऽप्यविचार्यमाणे १०८

नमेऽस्ति पूर्वं न परं न चांतरं न बाह्यमस्त्यैव

सदामुनीश्वराः

यथैव सिद्धार्थघनोरसात्मकस्तथैव

विज्ञानघनोऽहमास्तिकाः १०९

न संतिसंकल्पविकल्पबुद्धयो न च प्रमाता प्रमितः

प्रमाणम्

प्रमेय जातं च सदा विचारतः

पृथङ्नमत्तस्सुखभूमलक्षणात् ११०

न चास्ति हेयं परमार्थतस्सदा तथैव नादेयमपि

द्विजोत्तमाः

अतो न साध्यं परमार्थतोऽस्ति मे न साधनं

चाविदुषामि वद्विजाः १११
युष्माकमात्माहमतो हिसाक्षी मत्तो न यूयं पृथगागमज्ञाः
तथात्मभेदो जलपात्रभेदाद्दिवाकरस्येव शरीरभेदः ११२
न जायते मृयते नापि चात्मा नायं भूत्वा भविता वापि भूयः
अजो नित्यो शाश्वतो यं पुराणः स्वभावतो विमलो ब्रह्मभूतः ११३
एवं विजानंति नमां पृथग्जनास्तथापि तेषामहमात्मरूपः
पुरा विजानंति विशुद्धबुद्धयः स्वरूपमाम्नाय वचोभिरेव माम् ११४
मुनीश्वराः कर्मविहाय मोहजं विशूद्धविज्ञानमवाप्य वा कृजम्
विहाय वर्णाश्रमकल्पनामिमां शरीरमाभारतया विचिंत्यताम् ११५
सुखेन वर्तध्वमविद्यया गतं मनुष्यभावं च विहाय देहजम्

विहाय संकल्पविकल्पवासनामनुग्रहाणाहमपो च
मास्तिकाः  ११६
सुषुप्त्यवस्थासुखबोधवस्तुनि प्रकल्पिताः
स्वप्नवदात्मनि द्विजाः
तथैव जाग्रत्स्वपि कर्मणागतं ततो विहाय त्रितयं सदा
नृतम्  ११७
तुरीयरूपं त्रितयावभासकं तथाविभासं स्वयमेव
मायया
अनाप्रतं वेदनिधिं पुराणं महानुभावैरनुभूयतामिह  ११८
कृयमाणानि कर्माणि ज्ञानप्रापैरनंतरम्
न संस्फुरंति विद्यां सः पद्मपत्रं यथा जलम्  ११९
कर्तारं कम्पबध्नाति कर्तृत्वं विदुषो न हि
तथापि भाति कर्तृत्वं विदुषो दग्धवस्त्रवत्  १२०
एतावतानसरबंधं कर्तृत्वं विदुषो भवेत्
कर्तृत्वस्य विनष्टत्वान्मुख्यस्याज्ञानहानितः  १२१
प्रारब्धकर्मणां भोगात्क्षयो न ज्ञानवह्निना
विदुषो विदुषश्चापि द्विधा चैवं श्रुतिस्मृतिः  १२२
अनारब्धानि कर्माणि ज्ञानिनो ज्ञानवह्निना

प्रदूह्यं ते यथा वह्नौ प्राप्तं तूलं प्रदह्यते १२३
अज्ञानांभो निधौ विप्रानिमग्नानां शरीरिणाम्
वर्णत्वमाश्रमत्वं च स्वभावादनुवर्तते १२४
पुनर्नियोज्यः पुरुषः स्वाध्यायस्य भविष्यति
पुनः करोति कर्माणि विवशः पुरमाश्रितः १२५
तेषां पुरोपजोगाय मृयते जायतेऽपि च
एवमेव पुनर्विप्राश्चक्रवद्भ्राम्यते जनः १२६
कर्मणामुपभोगेन प्रायश्चित्तेन वा क्षयः
अनन्याच्च तथा ज्ञानात् क्षयो नास्तैव कर्मणाम् १२७
अवश्यमनुभोक्तव्यं कृतं कर्मशुभाशुभम्
नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि १२८
तस्मान्नकर्मणामुक्तिर्विना ज्ञानेन सुव्रताः
ज्ञानादज्ञानविच्छित्तिर्लोकसिद्धाश्रुतावपि १२९
भवंतः केवलं कर्म समाश्रित्य विमुक्तये
विहाय सांख्यं वेदोक्तमचिरादेवमुक्तिदम् १३०
अज्ञानाच्चान्यथा ज्ञानान्नकुर्वीतपरिश्रमम्
तस्मादहं मुनिश्रेष्ठाः कृपयैवानयानघाः १३१
आगतो भवतां देशे भिक्षमाणश्छलेन तु

सर्ववेदांतसर्वस्वं समादाय मुनीश्वराः १३२
युष्मभ्यं कृपया दत्तं मया ज्ञानं विमुक्तिदम्
जन्मंतरसहस्रेषु यज्ञदानादिभिर्द्विजाः १३३
नराणां क्षीणपापानां श्रद्धा चैव प्रजायते
यज्ञास्तपांसि दानानि तीर्थसेवा जपो व्रतम् १३४
सर्वं लिंगार्चना हीनं फला धनभवेद्द्विजाः
सर्वेषामेव धर्माणां मल्लिंगाराधनं परम् १३५
भवद्भिर्नार्चितो लिंगो चिरं कालं महद्द्विजाः
तस्मान्मोहो महान्जातो युष्माकं मुनयः पुरा १३६
ब्रह्मणो वचनाल्लिंगे भवद्भिरहमर्चितः
श्रीकाळहस्तिनाथापि दृष्टो युष्माभिरादरात् १३७
तेन पापानि दग्धानि युष्माकं सकलानि च
ज्ञानं च वाक्यजं भवद्भिः करबिल्ववत् १३८
नास्ति कानां मनुष्याणां अज्ञानां धीकृतात्मनाम्
ज्ञानं नरो च ते किंचिद्द्वेष एव प्रजायते १३९
तस्माद्भवद्भिर्मुनिभिः परीक्ष्य भुविमानवान्
+तव्यं ब्रह्मविज्ञानं इदमाम्नाय वाक्यजम् १४०
आम्नाय वाक्यजं ज्ञानं ज्ञानमित्युच्यते मया

अज्ञानमितरद्विप्राः फलतो मुक्तिसिद्धये १४१
स्थापयध्वमिमं मार्गं वैदिकं मुनिपुंगवाः
अन्यथा नोपकाराय भवेत् ज्ञानं ममा ज्ञया १४२
अवैदिकानि शास्त्राणि मयैव विहितानि तु
मूर्त्यं तरेण गांगत्वा मोहनाय द्विजोत्तमाः
महापापवतां नृणां तेषु वांछापि जायते १४३
नास्ति तेषां गतिर्विप्राः कल्पकोटिशतैरपि
ततस्समस्तैर्युष्माभिर्मार्गो यं वैदिकः परः १४४
स्थापनीयस्सदा भक्त्या हिताय जगतो द्विजाः
इत्येव मुक्ता मुनयः स्वमूर्ध्नि श्रद्धा तिरे केण
ममांघ्रियुग्मम् १४५
नत्वा विधायाथ समाहितेन चित्तेन मामात्म तयानुभूय
विद्या बलेनैव मम प्रसादाद्भक्त्या च
वेदांतविचारमार्गम् १४६
त्यक्ताभिमाना भुविसुस्थिरं सदा
चक्रुर्हितायाखिलचेतनानाम् १४७
एवं ब्रुवन्मुनिश्रेष्ठैः स्थापितो हृदयो परि
श्रीकाळहस्तिशैलाख्यं महास्थानं गतो मुने १४८

केषां चिन्मुनिपुत्राणां मुनीनां भावितात्मनाम्
यथा मयोदितं ज्ञानं श्रुतमप्येन सा न तत् १४९
ते पुनर्दुःखताः पुत्रास्समालोक्य परस्परम्
श्रीकाळहस्तिशैलाख्यं गत्वा भक्त्या समाहिताः १५०
सुवर्णमुखरी स्नानं माखमासे मखे दिने
कृत्वा प्रदक्षिणी कृत्य प्रणम्य परमेश्वरम् १५१
पंचाक्षरेण मंत्रेण भक्त्या संपूज्य नित्यशः
वत्सरांते पुनस्तस्यां नद्यां स्नानं प्रचक्रिरे
श्रीकाळहस्तिना धोहं तेषामिष्टार्थसिद्धये १५२
उमया मम पुत्राभ्यां नंदिनादृषभेण च
विष्णुना च विरंचेन देवराजेन सुव्रत १५३
मद्भक्तैरखिलैस्सार्थं नद्यामस्यां मखे दिने
पर्वस्पृष्टे मुने माखे मासि स्नातोऽस्मिते पुनः १५४
निवृत्तपापाश्चिद्रूपमवापुः परमर्षयः
ज्ञातवंतः पुरावृत्तं श्रुतं स्मृत्वा परोक्षतः १५५
पुनस्ते मुनयस्तस्मिन् देशे वेदविदां वर
ज्ञात्वा देशस्य माहात्म्यं वर्तं ते ह्यनसूयया १५६
एवं विशिष्टे देशेऽस्मिन् यथा शक्ति ददाति यः

सूवर्णं धान्यमन्यद्वा स रुद्रो नात्र संशयः १५७
अयं देशे ममाभीष्टो देव्याश्च मुनिसत्तम
समंताद्योजनं ब्रह्मन् परिरक्ष्यामि सर्वदा १५८
अस्मिन्देशे मनुष्याणां मृतानां मुनिसत्तम
नभूयो जन्मलोकेस्मिन् सत्यं सत्यं न चान्यथा १५९
देशे स्यास्य मुनिश्रेष्ठ मनसा चाप्युपद्रवम्
उत्पादयंति ये मर्त्यास्तेषां पापफलं श्रुणु १६०
रौरवादिषु सर्वेषु क्रमेण मुनिसत्तम
नरकेषु महादुःखमनुभूयानुभूय च १६१
कल्पकोटिशतांते च नराः पापबलेन तु
पैशाचं रूपमास्थाय वर्षाणामयुतं पुनः १६२
भूमौ विष्ठानुजायंते क्रिमिरूपा हि हि दुःखिताः
जे पुनर्मानवा ब्रह्मन् देशस्यास्यैव रक्षकाः १६३
ते पुनर्मरणादूर्ध्वं विमानं सार्वगामिकम्
आरुह्य पुत्रपौत्राद्यै सुप्रीताश्च तपो धन १६४
इंद्रलोके चिरं भुक्त्वा प्राजापत्ये च सुव्रत
विष्णुलोके पुनस्साक्षाछिवलोके मया सह १६५
सर्वान् कामान् मुने भुक्त्वा यावद्विष्णु पुरं पुनः

मत्प्रसादात्परं ज्ञानं लब्ध्वा मुक्ता भवंति हि १६६
अनेन ++ शो नास्ति नास्ति लोकत्रयेष्वपि
तस्माद्देशमिमं धीमा क्षयेच्छ्रद्धया सह १६७
इत्येवमुक्तं परमं रहस्यं वसिष्ठवेदांतमहानिधानम्
श्रद्धाविहीनाय न देयमेतद्भक्ताय देयं भवनाशनाय
१६८
य इमं पठते ध्यायं श्रुणुयाद्वा दिने दिने
सर्वपापविनिर्मुक्तस्सम्यक् ज्ञानं सगच्छति १६९
इत्युपपुराणे वासिष्ठलैंग्ये भिक्षाटनमहिमानुवर्णनं नाम
दशमोऽध्यायः

एकादशोऽध्यायः
ईश्वरः
पुराब्रह्मजगत्स्त्रष्ट्वा रमयामासभार्यया
चिरकालं स विश्वात्मा कामबालेन पीडितः १
तस्यां तेन समुत्पन्नं पुत्राणामयुतत्रयम्
ते पुनः सूनवः कामात्प्रसह्य स्त्री कुलं मुने २
दूषयामासुरत्यर्थं तेभ्यो जाताश्च राक्षसाः

राक्षसैश्च बगत्सर्वं पीडितं क्रोधमूर्च्छितैः ३
ततस्संभूय देवाश्च मुनस्संशितप्रताः
ब्रह्मणं भार्ययानार्धं क्रीडमानं समागताः ४
प्रणम्य दंडवद्भूमौ कृत्वा शिरसि चांजलिम्
+रोत्रैः प्रभोधयामासुस्सुप्तं विष्णुमिहो दधौ ५
भगवन्भूतभव्येश भव सागरतारक
नमस्तुभ्यं जगन्नाथ नमः कमलसंभव ६
नमस्सर्वजगत्पीडा परिहाररताय च
नमो देवादिदेवाय देवदेवाय ते नमः ७
वेदवेद्याय वेदाय+मो वेदार्थदायिने
नमः पापवतां नृणां पापनाशादि दायिने ८
नमो रुद्राय शर्वाय विष्णवे परमेष्ठिने
सर्वाय सर्वगोप्त्रे च सर्वातीताय ते नमः ९
अनया क्रीडमानेन भवता सह विस्मृतम्
रक्षणं जगतो देवराक्षसैः पीडिता वयम् १०
भवंतं शरणं प्रीत्या प्रपन्नवयमीश्वर
भगवन् कृपये वास्माननुपालयदुःखतान् ११
ईश्वरः

इति विज्ञापितो ब्रह्मा विलोक्यमुनिसत्तमान्
प्राह गंभीरया वाचा भवद्भिस्त्यज्य तामयम् १२
इत्युक्त्वा मुनिदेवेभ्यो ब्रह्मसर्वजगत्पतिः
पुत्रमुत्पादयामास राक्षसा किं महाबलम् १३
तेन सर्वे हता ब्रह्मन् राक्षसा लोकभाधकाः
पुनर्ब्रह्मन् सुरास्सर्वे मुनयश्च तपो दनाः १४
अवर्त ताभया सर्वे स्थाने वेदविदां वर
एवं समाहिते लोके ब्रह्मा स्वात्मानमात्मना १५
विलोक्य दूषयामास धिक्धिः कामेन पीडितम्
अहोमोहास्य माहात्म्यं कः पुमान् लंघनक्षमः १६
न जातु++कामानामुपभोगेन शाम्यति
भाविषा कृष्णावर्त्मेव भूय एवाभिवर्धिते १७
इत्थं संचित्य विश्वात्मा ब्रह्मा ब्रह्मविदां वर
सात्विकं भावमाश्रित्य सह देव्या समागतः १८
श्रीकाळहस्तिशैलाख्यं स्थानं गत्वा जतेंद्रियः
जटा वल्कलसंयुक्तो भस्मोद्धूळितविग्रहः १९
रुद्राक्षमाला भरणास्त्रीपुंड्रां कितमस्तकः
स्नानं त्रिषणं कृत्वा सुवर्णमुखरी जते २०

शाखमूलफलाहारः पादांगुष्ठाग्रविक्षकः २१
ऊर्ध्वबाहुर्निरालंबो दृढचित्तश्च निर्भयः
श्रीकाळहस्तिशैलेशं वीक्षमाणो महामुने २२
श्रीमत्पंचाक्षरं मंत्रं सतारं सर्वदाजपन्
दिव्यं वर्षसहस्रं तु चचार सुमहत्तपः २३
एवं चचार भार्या च तपस्तस्य महात्मनः
ततः प्रीतो भवद्ब्रह्मन् अतीव तपसा विधेः २४
मम भार्या च सुप्रीता ब्रह्मन् गिरिवरात्मजा
पुनर्मां प्रार्थयामास ब्रह्मा देवीं च भार्यया २५
धार्मिकं कृपयोपेतं कृतकृत्यं जितेंद्रियम्
सम्यक् ज्ञानेन संपूर्णं पुत्रमिच्छावशंकर २६
इत्येवं प्रार्थितो दात्रा स भार्येणाहमंबया
सह प्रीतो वरं पुत्रं सम्यक् ज्ञानेन संयुतम् २७
ऋभुसंज्ञं विरिंचाय दत्तवानस्मि सुव्रत
ऋभुं चाजनयद्ब्रह्मा नमा लिंग्य स्वभार्यया २८
कृतार्थो मत्प्रसादेन जितकामो जगत्पतिः
पुनश्च प्रार्थयामास देवं तत्रैव सुव्रत २९
+माखमासे मुखर्क्षे यः पुमान् श्रद्धा पुरस्सरम्

-सुवर्णमुखरी स्नानं कृत्वा दत्वा यथाबलम् ३०
श्रीकाळहस्तिनाथाय विदुषे ब्राह्मणाय च
कृत्वा प्रदक्षिणं भक्त्या देवदेवं त्र्यंबकम् ३१
अष्टोत्तरशतं ब्रह्मन् दिवा वर्जितभोजनः
ददस्वपुत्रमीशाने त्येवमप्रार्थये भृशम् ३२
तस्य पुत्रं प्रयच्छेशप्रार्थनैषाममा व्यया
ईश्वरः
इत्येवं प्रार्थितो धात्रा देवदेवो महेश्वरः ३३
प्राह देवीं समालोक्य ब्रह्मन् मुनिपुंगव
यः पुमान् माखमासीत्थं मखर्क्षे कुरुते व्रतम् ३४
माखमासं समारभ्य सोब्दत्पुत्रमवाप्नुयात्
एवं भक्त्या व्रतं नारी नरो वा कुरुते तु यः ३५
तस्य दारिद्र्यनाशस्स्याद्वत्सरान्मत्प्रसादतः
विजयार्थी जयं याति धनार्थी धनवाप्नुयात् ३६
वश्यार्थी वश्यमाप्नोति राज्यार्थी राज्यमाप्नुयात्
रोगार्तो मुच्यते रोगान्मोक्षार्थी मोक्षमाप्नुयात् ३७
विद्यार्थी लभते विद्यां सुखार्थी लभते सुखम्
अस्मिन्देशे मनुष्याय यस्मै कस्मै ददाति यः ३८

आवासभूमिमन्यद्वा स यााति परमां गतिम्
अस्मिन् देशेऽद्भुतं दत्तं तपस्वाध्याय कर्म च  ३९
अणुमात्रमपि ब्रह्मन् मेरुणा सदृशं फलम्
इत्युक्त्वा ब्रह्मणे ब्रह्मन् महादेवो महेश्वरः  ४०
तत्रैवांतर्हितस्सोमसोमार्थी कृतशेखरः
ब्रह्मानद्यां पुनः स्नात्वा स्थानेऽस्मिन्नंबिका पतिम्  ४१
प्रदक्षिणत्रयं कृत्वा स्तोत्रैः स्वभार्यया
ब्रह्मलोकमनुप्राप्तो ब्रह्मन् देवैस्समाव्रतः  ४२
ऋभुश्चोत्पन्नविज्ञानो निसर्गादेव सत्तम
दिव्यं वर्षायुतं ब्रह्मन् चचार पृथिवीमिमाम्
जन्मंतरकृतात्पापान्नस्तिक्यात्सर्वजंतवः  ४३
ऋभुं दृष्ट्वापि तत्त्वज्ञमुपेक्षां चक्रिरे भृशम्
सोपि स्वात्मानि संतुष्टो निर्द्वंद्वो निष्परिग्रहः  ४४
कृपया परया युक्तो विद्यानुच्छित्तिसिद्धये
शिष्यं शिष्टगुणोपेतं प्रार्थयामाननुव्रत
यथा वः प्रवतायंति यथा मासा अहर्जरम्  ४५
एवं मां श्रोतुकामाश्च धातरायंतु सर्वतः
इत्येवं प्रार्थितेशिष्ये विद्यानुच्छित्ति सिद्धये  ४६

जन्मांतरकृतात्पुरायान्मत्प्रसादाश्च सुव्रत
पुलस्त्य पुत्रो धर्मिष्टो निदाघाख्यो ग्रहाश्रये ४७
ऋभुं दृष्ट्वा महा प्रेतः प्रणिपत्यात्मवेदिनम्
भोजयित्वा द्विजं प्राह प्रसादं कुरुते द्विज ४८
इत्युक्तो ब्राह्मणेनासौ निदाघेन मुनीश्वरः
ऋतुः कृपाति रेकेण प्रोवाच ज्ञानमुत्तमम् ४९
ऋभुः
यस्मादिमानिजायंते भूतानि भुवनानि च
एवं जीवंति जातानि लीयंते यत्र तु द्विज ५०
तत् जिज्ञानस्ववेदांतैर्ब्रह्मेति सततं मुदा
तद्ब्रह्मेति जगत्सृष्ट्वा प्राप्य जीवात्मना जगत् ५१
सच्च त्यच्चाभवच्छक्त्या निरुक्तं चाभवद्विज
अनिरुक्तं च विप्रेंद्र तथानिलयनेतरे ५२
विज्ञानं चाभवत्तद्वदविज्ञानं द्विजोत्तम
सत्यं चानृतं च बहुना किमुक्तेन द्विजोत्तम ५३
यदि दंदृश्यते दृष्ट्वा श्रूयते श्रवणेन च
गृह्यते मनसा चान्यैस्तत्सर्वं ब्रह्म केवलम् ५४
कोशमन्नमयं भातिमात्मना मायया च तम्

स्वप्नदेहमिवासत्यं इति विद्धि विलक्षणम्  ५५
प्राणापानादि भेदेन विधिन्नो भाति यो द्विज
यो यं प्राणमयः कोशस्सो यं माया विजृंभितः  ५६
संकल्पश्च विकल्पश्च कुरुते सत्यवत्सदा
यो यं मनो मयः कोशस्सनास्तीत्यवबुध्यताम्  ५७
सुखदुःखमहं ज्ञाता कर्ता भोक्तेत्य भाति यः
आनंदमयकोशो यं सनास्तीत्येव बुध्यताम्  ५८
सत्यं ज्ञानमनंतं यद्ब्रह्मनंदं श्रुतौ श्रुतम्
तद्विद्धि हृदये भातं प्रत्यङ्मात्रमिति द्विज  ५९
भिद्यते हृदयग्रंधिश्छिद्यंते सर्वसंशयाः
क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे वरावरे  ६०
वाचा न भ्युदितं यच्च येन वाग्वदति द्विज
तद्ब्रह्मत्वं सदा विद्धि नेदं वाग्विषयंन्नवान्  ६१
मनयायन्नगृह्येतयेनाभून्मनसा गतिः
तद्ब्रह्मत्वं सदा विद्धि न मनश्च वयो मत  ६२
यच्चक्षुषानगृह्येत येन चक्षुश्च गृह्यते
तद्ब्रह्मत्वं सदा विद्धि नेदं दृष्ट्वाभिवीक्षितम्  ६३
श्रूयते मनसा विप्र यच्छ्रोत्रेणेंद्रियेण तु

तद्ब्रह्मत्वं सदा विद्धि नेदं श्रोत्रं श्रुतं द्विज ६४
यच्च न प्राणिति प्राणो येन प्राणः प्रणीयते
तद्ब्रह्मत्वं सदा विद्धि नेदं प्राणविचेष्टितम् ६५
यद्विज्ञातं त्वया विप्र यन्न विज्ञातमात्मना
ताभ्यामन्यत्परं ब्रह्म विद्धि वेदांतवाक्यजम् ६६
एको देवस्सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतांतरात्मा
कर्माध्यक्षस्सर्वभूताधिवासस्साक्षी चेता केवलो
निर्गुणश्चेति विद्धि ६७
न भाति सूर्यो न च तारकाश्शशी न भाति विद्युन्न च
भाति पावकः
प्रकाशमानेपरमात्मवस्तु निप्रभाति सर्वं परमात्मना
सदा ६८
संकल्पश्च विकल्पश्च कुरुते सत्यवत्सदा
यो यं मनोमयः कोशः सनास्तीत्यवबुध्यताम् ६९
सुखदुःखमहं ज्ञाता कर्मा भोक्तेत्य भाति यः
आनंदमयकोशो यं सनास्तीत्येव बुध्यताम् ७०
शरीरमेवाशनमस्ति सर्वदा न चात्मतत्त्वं परमार्थदर्शने
करोति सर्वत्र निदाघमारुतश्शरीरगो नैव वूनविक्रियः

७१
देहात्मप्रविभागबोधममलंतर्कैस्सदा ब्रह्मितम्
सन्यासाश्रमशांतिदांति सहितं यज्ञादिदग्धैन सः  ७२
संपाद्य श्रुतिमस्तकैश्च महता यत्नेन विद्यां विना
यस्संसारमविद्ययैव विहितं छित्वा विमुक्तो भवेत्  ७३
यद्ज्ञानेन निदाघदृश्यमखिलं विज्ञातमेवानिशम्
मृत्पिंडेन घटादिवद्भवति तत्तत्सत्यं ततो न्यन्मृषा  ७४
तत्त्वं महाबलेन सततं भक्त्या च मत्सेवया
तत्त्वं संहरसिश्रुतिश्च तदसीत्युच्चैर्मुदावक्ति हि  ७५
एतावान् श्रुतिमस्तकैरभिहितो ह्यर्थो निदाघादरा
देतावानुदितो मया मुनिगणैरन्यैरपि ज्ञानिभिः  ७६
एतावान् परमेश्वरो वदति मे विष्णुर्विरिंचोऽप्यतः
कारुण्यादहमुक्तवानतितरां विद्ध्येनमर्थं  मुदा  ७७
ईश्वरः
इति ब्रह्म सुतो ब्रह्मन् विद्यानुच्चित्तिसिद्धये
निदाघायोक्तवांस्तत्वं तत्पुनस्तेन विस्मृतम्  ७८
निदाघस्याल्पभाग्यस्य न विद्या वासनाभवत्
प्रतिबंधकबाहुळ्यात्प्रवृत्ता कर्मवासना  ७९

अतीते वत्सरे दिव्ये सहस्रे स ऋभुः पुनः
निदाघस्य गृहं गत्वाद्वारिकेवलवत्स्थितः ८०
निदाघस्तं समालोक्य प्रणिपत्य स्वभार्यया
भोजियित्वोपचारेण पृष्टवान्कुत आगतः ८१
क्व गच्छति भवान् तृप्तिर्भोजनादस्ति वानवा
इति पृष्टो निदाघेन स ऋभुः प्राह सत्तमः ८२
ऋभुः
आकाशवदहं पूर्णो देहपादाविवर्जितः
गमनागमनेनस्तः क्षुत्पिपासा च मे न हि ८३
त्वद्दृष्ट्या देहसदाभवो गमनागमने तथा
क्षुत्पिपा चमद्दृष्ट्या नास्त्येव परमार्थतः ८४
ऋभुः
इति श्रुत्वा निदाघोऽपि मासदृष्ट्या विलोकयन्
प्राहा मिथ्या कथा प्रोक्तं भवताममसन्निधौ ८५
प्रत्यक्षेण विजानामि शरीरं गमनं तथा
भोजनं मैथुनं नाशं तवाहं पुरुषाधम ८६
गच्छगच्छ महादुष्टसत्यहीन ममार्गतः
पुनश्चाहात्मवद्ज्ञानमलभ्यमिति चिंतयन् ८७

सत्यहीनानरास्सर्वे वच्यंते नरकालये
सत्यहीनैर्न चाश्वासस्सहसश्चदर्मनम्  ८८
नराणां नरकायोक्तं मुनिभिस्सूक्ष्मदर्मिभिः  ८९
इत्युक्तो ब्रह्मपुत्रश्च निदाघेन मुनीश्वर
पुनश्चाहात्मवद्ज्ञानमलभ्यमिति चिंतयन्  ९०
ऋभुः
विप्रविप्र निदाघात्र प्रत्यक्षं किं ब्रवीषितम्
विमृश्य मे विद्वन् सत्यनिष्ठनरोत्तम  ९१
ईश्वरः
इति ब्रह्मसुते मोक्तो निदाघोप्याह पूर्ववत्
पुनश्च परया युक्तः कृपया स ऋभुं मुनिः  ९२
निदाघा योक्तवास्तत्वं शिष्यस्नेहादहं यथा
ऋभुः
यद्यत्प्रकाशते विद्धि तत्तद्भानात्मकं न वा  ९३
भानात्मकं चेद्ब्रह्मैव कथं देहादि दर्मनम्
तदभानात्मकं तर्हि प्रत्यक्षेण न भाति तत्  ९४
भान संबंधतो भानमपि विद्यन् न सिद्ध्यति
स्वतो भानविहीनस्य कथं भानेन संगतिः  ९५

तस्मात्प्रत्यक्षतो दृष्टं ब्रह्मैवात्र विचारय

अविचारात्मिका ह्येषा प्रतीतिः प्रतिभासते ९६

विचारेण विसृज्यैनां ब्रह्मसर्वं विलोकय

महेश्वरः

इत्येवमुक्त्वा स ऋभुर्महात्ममप्रसादात्परिलब्धयोगः

अनाकुलस्वात्मनितुष्टभावो न किंचिदप्याह पुनर्वसिष्ठः

९७

निदाघस्तु वचः श्रुत्वा ब्रह्मपुत्रस्य धीमतः

प्रदक्षिणत्रयं कृत्वा पवातभुवि दंडवत् ९८

तस्य भार्या मुनिश्रेष्ठ प्रणिपत्य पतिव्रता

गंधपुष्पादिभिर्ब्रह्मन् पूजयामासनादरात् ९९

तं निदाघस्समा लिंग्य पुनश्चाह द्विजोत्तम

कोभवानिह सर्वज्ञो मम गेहं समागतः १००

दर्मनात्तवसम्तुष्टिर्जायते महती द्विज

इत्युक्तो ब्रह्मविच्छ्रेष्ठो निदाघे नाद्रमानसः १०१

ऋभुरस्म्यहमाचार्यः पुरस्यो देवते नघ

इदानीमागतो विद्यामयोक्तासुस्थिता नघ १०२

इति जिज्ञासयावत्सगमिष्यामि यदेच्छया

त्वं च कर्मपरित्यज्यमदुक्तार्थपरो भव १०३
इत्युक्त्वा मानमास्थाय ब्रह्मवित्प्रवरो गमत्
निदाघश्च तदेत्युक्त्वा प्रणिपत्य द्विजोत्तमम् १०४
अन्वगच्छन्मुने कंचिद्देशं भक्त्या स्वभार्यया
एवं ब्रह्मसुतेनोक्तो निदाघे त्यक्तमानसः १०५
प्रनश्च कर्मनिष्ठो भूत्सर्वदा मुनिसत्तम
पुनस्संवत्सरे तीते सहस्रे दैविके नघ १०६
ऋभुर्दत्वा परिज्ञानं निदाघायादरेण तु
निर्वाणं परमं ब्रह्मनवापपरमामृतम्
निदाघो दग्धपापश्च विशुद्धहृदयो द्विजः १०७
ब्रह्मसूनोपदेशेन प्रबुध्य परमात्मनि
बुध्वा माया मयं सर्वं त्यक्त्वा वर्णाश्रमं सदा १०८
प्रारब्धकर्मणा कंचित्कालं स्थित्वा शरीशके
भुक्त्वा भोगानविद्योत्थानाभासानात्मनि स्थितान् १०९
तदंते विद्यया विद्यां दग्ध्वा मुक्तो भवत्स्वयम् ११०
इत्युक्तं परमहितं जगद्धिताय श्रुत्युक्तं परमहितं
महानुभावः
प्रत्युक्तं द्विजगुरुणा विमुक्तये यत्तच्छिष्यं परमं पदं

वसिष्ठभक्त १११

इत्युपपुराणे वासिष्ठलैंग्ये ऋभुजननिदाघोपदेशं नाम

एकादशोऽध्यायः

द्वादशोऽध्यायः

ईश्वरः

पुराकाश्मीरदेशे तु वृषभो तीवनिर्घृणः

स पुनस्सर्वजंतूनामनिष्टमकरोत्सदा १

जन्मांतरकृतात्पुण्या दध्वश्राद्धं मुनीश्वर

शिवयोगि न मायांतं दृष्ट्वा सोऽपि मुदान्वितः २

प्रणिपत्यमहात्मानं पादौ प्रक्षाळ्य वारिणा

पादोदकं मुदा पीत्वा दत्वा यावनमोदनम् ३

आकरोद्गात्रशिश्रूषां भार्यया सह सुव्रत

ततः प्रसन्नो योगींद्रः स्वात्मतत्वैकसंस्थितः ४

महाकारुणीकः श्रीमान् वृषतं प्रत्यभाषत

योगी

अहं तुष्टोऽस्मि सच्छूद्रभक्त्याने न हि तं तव ५

वक्ष्यामि श्रुणु मद्वाक्यं सहितो भार्यया नया

मच्छिश्रूषा बलाद्दग्धं तव पापं महत्तरम्  ६
श्रीकाळहस्तिशैलाख्यं स्थानं गच्छातिवेगतः
ईश्वरः
इत्युक्त्वा सो गमद्ब्रह्मन् शिवयोगी महा मतिः  ७
ततस्सभार्यो वृषळस्संतुष्टो मुनिसत्तम
सुवर्णमुखरीं दृष्ट्वा दंडवत्प्रणिपत्य च  ८
माखमासे मखर्क्षे स्यां नद्या स्नात्वा स्वभार्यया
नित्यमष्टोत्तरशतं कृत्वा ब्रह्मन्प्रदक्षिणम्  ९
श्रीकाळहस्तिशैलेशं नमस्कृत्वा पुनः पुनः
सुशोभनं मठं कृत्वा दत्वा च शिवयोगिने  १०
मासि मासि वृतीपाते मखर्क्षे तु मुनीश्वर
श्रीकाळहस्तिनाधाय तथैव शिवयोगिने  ११
धनं धान्यं तिलं वस्त्रमपि दत्वा यथा बलम्
वत्सराणां त्रयं कृत्वा व्रतमेतत्समाहितः  १२
तदंते मखर्क्षे तु माखमासि मुनीश्वर
सुवर्णमुखरी स्नानं कृत्वा देवाय भक्तितः  १३
दत्वा भूमिं तथा दीपं तथा दीपं यथा बलम्
ब्राह्मणेभ्यश्च योगिभ्यो मद्भक्तेभ्यो यथा बलम्  १४

पूजां कृत्वा व्रतं ब्रह्मन् समाप्येवं समाहितः
कालेन मरणम् प्राप्तः पुनरिंद्रो भवेद्द्विज १५
स पुनः पूर्वमैश्वर्यं भुक्त्वा सार्थं स्वभार्यया
श्रीकाळहस्तिनाथस्य प्रसादेन पुनश्च सः १६
सुवर्णमुखरी तोये स्नानं कृत्वातिभक्तितः
पूजयामास देवेशं प्रसन्नं भक्तवत्सलम् १७
ततः पंचाक्षरं मंत्रं प्रणवेन षडक्षरम्
सांगं प्रोवाच धर्मात्मा मन्नियोगाद्बृहस्पतिः १८
गुरु
ऋषिर्ब्रह्मास्य मंत्रस्य प्रोक्तो वेदविदां वरैः
गायत्रीच्छंद इत्युक्तं शिव एवास्य देवता १९
ओंकारबीजमित्याहुरकारश्शक्तिरुच्यते
न कारादीन् क्रमाद्वर्णानंगुष्ठादिषु पंचसु २०
तथा मूर्ध्नि ललाटे च हृदिनाभौ पदद्वये
विन्यस्याभ्यंतरं वर्णान् शक्तिर्षिकेण संयुतान् २१
हृदये च तथा मूर्ध्नि शिखायां कवचे तथा
नेत्रे चास्त्रे च विन्यस्य प्राणायामत्रयं कुरु २२
हविष्या शीजितक्रोधो वाग्यतो देवसन्निधौ

लक्षमेकं जपित्वैवं मंत्रं वज्रधरादरात्  २३
पुनस्सिद्धेन मंत्रेण वांछितं साधयादरात्
अनवाप्य मतो नास्ति नास्ति राजन् जगत्रये  २४
यः प्रातरुत्थितो नित्यं जपे दक्षोत्तरं शतम्
तस्य सर्वाणि पापानि नश्यत्येव न संशयः  २५
शिवेतिवाचं यो नित्यं चंडालोऽपि वदेन्मुदा
सह तेन वदेद्वाचं सह तेन वसेत्सदा  २६
यश्चतुर्वेदविन्नित्यशिवशब्दविवर्जितम्
तेन संभाषणं नित्यं न कुर्यान्मोहतोऽपि च  २७
यदि कुर्यात्प्रमादेन प्रायश्चित्ते भवेद्द्विजः
नित्यमष्टसहस्त्रं यो जपेन्मंत्रं समाहितः  २८
ब्रह्महत्यादिकं पापं षण्मासात्तस्य नश्यति
व्याधयश्च विनश्यंति मंत्रस्यास्य जपेन च  २९
वश्याकर्षणविद्वेषस्तंभनोच्चाटनादयः
मंत्रेणानेन सिध्यंति देवराजमहामते  ३०
अणिमादिमहासिद्धिर्मंत्रेणानेन सिध्यति
बहुनोक्तेन किं राजन्मुक्तिस्साक्षात्करस्थिता  ३१
तस्मादेतन्महामंत्रं धारयात्रविशेषतः

ईश्वरः

एवं पुरोहितेनोक्तो देवराजो मुनीश्वर  ३२

श्रीकाळहस्तिशैलाख्ये जप्त्वा लक्षं समाहितः

श्रीकाळहस्तिनाथस्य प्रसादेन ममानघ  ३३

त्यक्त्वैश्वर्यं  पुनर्ब्रह्मन् ब्रह्माणं समुपाविशत्

ब्रह्मचर्यपरोदांतसत्यवादीमिताशनः  ३४

ततो ब्रह्मापि संतुष्टस्तस्मै मत्परमं वपुः

दर्शयामाससर्वात्मा सर्ववस्त्ववभासकम्  ३५

सोपि तं प्रणिपत्येशं ब्रह्माणं मुनिपुंगव

अवापपरमं भावं स्वकं कैवल्यसंज्ञितम्  ३६

पुन ++ स्य कैवल्यं मुनयश्च सुरासुराः

बहवो मुक्तिसिध्यर्थं  प्राप्ताः स्थानमिदं मुने  ३७

केचित्स्वर्गेच्छया ब्रह्मन् केचिद्तद्व्दयकांक्षया

सर्वे ते देशमाहात्म्यात्प्रसादादपि मे द्विज  ३८

अभयं नाप्तकामाश्च पुण्यकर्म फलादपि

य इमं देशमाश्रित्य सर्वैश्वर्यं  न साधयेत्  ३९

तस्य ब्रह्मन् वृथा जन्मश्वकीटादेर्यथा जनिः

य इमं देशमाश्रित्य न संसारं दरेक्षणात्  ४०

तस्य जन्म वृथा प्रोक्तं मुनिभिस्सूक्ष्मदर्शिभिः

अंत्यजो वाधमो वापि य इमं देशमाश्रितः ४१

स फलं तस्य जन्मोक्तं धार्मिकैस्तत्व चिंतकैः

अहो मोहस्य माहात्म्यं ब्रह्मन् ब्रह्म विदां वर ४२

इमं देशं विनालोके यदन्यत्र विचेक्षते

इत्येवमुक्तं श्रुतिसारलभ्यं विज्ञानमज्ञैरखिलैरलभ्यम्

४३

मुक्तेरुपायः कृपयामयैतच्छ्रद्धापि मीनस्य सदा न देयम्

मत्पादभक्ताय महानुभावत्वत्पादभक्ताय विलक्षणाय

४४

सत्यादियुक्ताय च देयमेतच्छिष्याय संसारविमर्दनाय

शरीरमर्थं च ददाति यः पुमान् करोति चाचार्य

समीरितं सदा ४५

तदाविधायामलबुद्धये मुने प्रदेयमेतत्सुखदं विलक्षणम्

पृष्टं त्वया यन्मुनिपुंगवेन लिंगप्रकाशेश्वरितेन विप्र ४६

उक्तं मया यत्नत एवहेतोर्वासिष्ठलैंगाख्यमिदं पुराणम्

यच्छ्रद्धा रहितः पुराण ++ तमेतद्भक्त्या पठति नरो

महानुभाव

तद्वक्त्रे वसती सदा महेश्वरी च हृद्पद्मे परमशिवः
प्रकाशते च ४७
यदि श्रुणोति पुराणमिदं मुदाभुक्तिमुक्तिकरं मुनिपुंगव
तस्य नश्यति पापकृतं स्वतस्सत्यमेव मया परिभाषितम्
४८
सकलभुवनरक्षाकारणं यो महात्मा प्रतिदिनमथसार्थं
वक्तिपुण्यो मुहूर्ते
सकलदुरितराशिध्वं सकंचास्य लोके
पशुपतिरिवमर्त्यैस्सर्वदा सोहि पूज्यः ४९
श्रीसूत उवाच
इदं वासिष्ठलैंगाख्यं पुराणं पारमेश्वरम्
सर्वलोकोपकाराय वसिष्ठेनैव निर्मितम् ५०
अध्यायाद्वादशश्लोकास्तावदष्टाशतं ततः
अशीतिरधिकं सम्यक् ज्ञानमस्मिन्प्रतिष्ठितम् ५१
नमो रुद्राय सोमाय सदासर्वस्य साक्षिणे
शर्वाय सर्वभीमाय संसारोत्तारहेतवे ५२
यस्याः पादांबुजद्वंद्वस्मरणादेवकेवलम्
विमुक्तिस्सर्वजंतूनां देव्यै तस्यै नमो नमः ५३

यत्प्रसादेन विज्ञानं यथावज्ज्ञायते नृणाम्
तं वंदे षण्मुखं साक्षाद्ज्ञानशक्तिधरं परम् ५४
यस्य प्रसादलेशस्य लवलाभबलेन तु
सर्वसिद्धिरयत्नेन तं नमामि विनायकम् ५५
इत्युपपुराणे वासिष्ठलैंग्ये दुष्कर्मकृच्छ्रूद्र
इंद्रपदप्राप्तिमहामानुवर्णनं नाम द्वादशोऽध्यायः
इति वासिष्ठलैंगं समाप्तम्

This text is based on two manuscripts,

1. Manuscript D15664, "Vāsiṣṭha Laiṅgam," Telugu script, bundled with Vāruṇa Upapurāṇa and Bhārgava Upapurāṇa: Sastri, M. Seshagiri, et.al., *A Descriptive Catalogue of the Sanskrit Manuscripts of the Government Oriental Manuscripts Library, Madras*, Madras 1901-1951, No. 15663, 15664, 15665.
2. "Vāsiṣṭha Laiṅgyam," 101 pages, paper, Devanāgarī script, Nepal government library, Kathmandu.

The first three chapters are the critical edition; the remaining chapters are the rough typescript based on the Chennai manuscript.